# Tejobindu Upanishad

# તેજોબિન્દૂપનિષત્

## Document Information

Text title : Tejobindu Upanishad

File name : tejobindu.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 37/108; Krishna Yajurveda- Yoga upanishad

Latest update : Feb. 3, 2000, October 7, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

Tejobindu Upanishad

# તેજોબિન્દૂપનિષત્

યત્ર ચિન્માત્રકલના યાત્યપહ્નવમઞ્જસા ।
તચ્ચિન્માત્રમખણ્ડૈકરસં બ્રહ્મ ભવામ્યહમ્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥ સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ તેજોબિન્દુઃ પરં ધ્યાનં વિશ્વાત્મહૃદિસંસ્થિતમ્ ।
આણવં શામ્ભવં શાન્તં સ્થૂલં સૂક્ષ્મં પરં ચ યત્ ॥ ૧॥

દુઃખાઢ્યં ચ દુરારાધ્યં દુષ્પ્રેક્ષ્યં મુક્તમવ્યયમ્ ।
દુર્લભં તત્સ્વયં ધ્યાનં મુનીનાં ચ મનીષિણામ્ ॥ ૨॥

યતાહારો જિતક્રોધો જિતસઙ્ગો જિતેન્દ્રિયઃ ।
નિર્દ્વન્દ્વો નિરહઙ્કારો નિરાશીરપરિગ્રહઃ ॥ ૩॥

અગમ્યાગમકર્તા યો ગમ્યાઽગમયમાનસઃ ।
મુખે ત્રીણિ ચ વિન્દન્તિ ત્રિધામા હંસ ઉચ્યતે ॥ ૪॥

પરં ગુહ્યતમં વિદ્ધિ હ્યસ્તતન્દ્રો નિરાશ્રયઃ ।
સોમરૂપકલા સૂક્ષ્મા વિષ્ણોસ્તત્પરમં પદમ્ ॥ ૫॥

ત્રિવક્ત્રં ત્રિગુણં સ્થાનં ત્રિધાતું રૂપવર્જિતમ્ ।
નિશ્ચલં નિર્વિકલ્પં ચ નિરાકારં નિરાશ્રયમ્ ॥ ૬॥

ઉપાધિરહિતં સ્થાનં વાઙ્મનોઽતીતગોચરમ્ ।
સ્વભાવં ભાવસઙ્ગ્રાહ્યમસઙ્ઘાતં પદાચ્ચ્યુતમ્ ॥ ૭॥

અનાનાનન્દનાતીતં દુષ્પ્રેક્ષ્યં મુક્તિમવ્યયમ્ ।
ચિન્ત્યમેવં વિનિર્મુક્તં શાશ્વતં ધ્રુવમચ્યુતમ્ ॥ ૮॥

તદ્બ્રહ્મણસ્તદધ્યાત્મં તદ્વિષ્ણોસ્તત્પરાયણમ્ ।
અચિન્ત્યં ચિન્મયાત્માનં યદ્વ્યોમ પરમં સ્થિતમ્ ॥ ૯॥

અશૂન્યં શૂન્યભાવં તુ શૂન્યાતીતં હૃદિ સ્થિતમ્ ।
ન ધ્યાનં ચ ન ચ ધ્યાતા ન ધ્યેયો ધ્યેય એવ ચ ॥ ૧૦॥

સર્વં ચ ન પરં શૂન્યં ન પરં નાપરાત્પરમ્ ।
અચિન્ત્યમપ્રબુદ્ધં ચ ન સત્યં ન પરં વિદુઃ ॥ ૧૧॥

મુનીનાં સમ્પ્રયુક્તં ચ ન દેવા ન પરં વિદુઃ ।
લોભં મોહં ભયં દર્પં કામં ક્રોધં ચ કિલ્બિષમ્ ॥ ૧૨॥

શીતોષ્ણે ક્ષુત્પિપાસે ચ સઙ્કલ્પકવિકલ્પકમ્ ।
ન બ્રહ્મકુલદર્પં ચ ન મુક્તિગ્રન્થિસઞ્ચયમ્ ॥ ૧૩॥

ન ભયં ન સુખં દુઃખં તથા માનાવમાનયોઃ ।
એતદ્ભાવવિનિર્મુક્તં તદ્ગ્રાહ્યં બ્રહ્મ તત્પરમ્ ॥ ૧૪॥

યમો હિ નિયમસ્ત્યાગો મૌનં દેશશ્ચ કાલતઃ ।
આસનં મૂલબન્ધશ્ચ દેહસામ્યં ચ દૃક્સ્થિતિઃ ॥ ૧૫॥

પ્રાણસંયમનં ચૈવ પ્રત્યાહારશ્ચ ધારણા ।
આત્મધ્યાનં સમાધિશ્ચ પ્રોક્તાન્યઙ્ગાનિ વૈ ક્રમાત્ ॥ ૧૬॥

સર્વં બ્રહ્મેતિ વૈ જ્ઞાનાદિન્દ્રિયગ્રામસંયમઃ ।
યમોઽયમિતિ સમ્પ્રોક્તોઽભ્યસનીયો મુહુર્મુહુઃ ॥ ૧૭॥

સજાતીયપ્રવાહશ્ચ વિજાતીયતિરસ્કૃતિઃ ।
નિયમો હિ પરાનન્દો નિયમાત્ક્રિયતે બુધૈઃ ॥ ૧૮॥

ત્યાગઃ પ્રપઞ્ચરૂપસ્ય સચ્ચિદાત્માવલોકનાત્ ।
ત્યાગો હિ મહતા પૂજ્યઃ સદ્યો મોક્ષપ્રદાયકઃ ॥ ૧૯॥

યસ્માદ્વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
યન્મૌનં યોગિભિર્ગમ્યં તદ્ભજેત્સર્વદા બુધઃ ॥ ૨૦॥

વાચો યસ્માન્નિવર્તન્તે તદ્વક્તું કેન શક્યતે ।
પ્રપઞ્ચો યદિ વક્તવ્યઃ સોઽપિ શબ્દવિવર્જિતઃ ॥ ૨૧॥

ઇતિ વા તદ્ભવેન્મૌનં સર્વં સહજસંજ્ઞિતમ્ ।
ગિરાં મૌનં તુ બાલાનામયુક્તં બ્રહ્મવાદિનામ્ ॥ ૨૨॥

આદાવન્તે ચ મધ્યે ચ જનો યસ્મિન્ન વિદ્યતે ।
યેનેદં સતતં વ્યાપ્તં સ દેશો વિજનઃ સ્મૃતઃ ॥ ૨૩॥

કલ્પના સર્વભૂતાનાં બ્રહ્માદીનાં નિમેષતઃ ।
કાલશબ્દેન નિર્દિષ્ટં હ્યખણ્ડાનન્દમદ્વયમ્ ॥ ૨૪॥

સુખેનૈવ ભવેદ્યસ્મિન્નજસ્રં બ્રહ્મચિન્તનમ્ ।
આસનં તદ્વિજાનીયાદન્યત્સુખવિનાશનમ્ ॥ ૨૫॥

સિદ્ધ્યે સર્વભૂતાદિ વિશ્વાધિષ્ઠાનમદ્વયમ્ ।
યસ્મિન્સિદ્ધિં ગતાઃ સિદ્ધાસ્તત્સિદ્ધાસનમુચ્યતે ॥ ૨૬॥

યન્મૂલં સર્વલોકાનાં યન્મૂલં ચિત્તબન્ધનમ્ ।
મૂલબન્ધઃ સદા સેવ્યો યોગ્યોઽસૌ બ્રહ્મવાદિનામ્ ॥ ૨૭॥

અઙ્ગાનાં સમતાં વિદ્યાત્સમે બ્રહ્મણિ લીયતે ।
નો ચેન્નૈવ સમાનત્વમૃજુત્વં શુષ્કવૃક્ષવત્ ॥ ૨૮॥

દૃષ્ટીં જ્ઞાનમયીં કૃત્વા પશ્યેદ્બ્રહ્મમયં જગત્ ।
સા દૃષ્ટિઃ પરમોદારા ન નાસાગ્રાવલોકિની ॥ ૨૯॥

દ્રષ્ટૃદર્શનદૃશ્યાનાં વિરામો યત્ર વા ભવેત્ ।
દૃષ્ટિસ્તત્રૈવ કર્તવ્યા ન નાસાગ્રાવલોકિની ॥ ૩૦॥

ચિત્તાદિસર્વભાવેષુ બ્રહ્મત્વેનૈવ ભાવનાત્ ।
નિરોધઃ સર્વવૃત્તીનાં પ્રાણાયામઃ સ ઉચ્યતે ॥ ૩૧॥

નિષેધનં પ્રપઞ્ચસ્ય રેચકાખ્યઃ સમીરિતઃ ।
બ્રહ્મૈવાસ્મીતિ યા વૃત્તિઃ પૂરકો વાયુરુચ્યતે ॥ ૩૨॥

તતસ્તદ્વૃત્તિનૈશ્ચલ્યં કુમ્ભકઃ પ્રાણસંયમઃ ।
અયં ચાપિ પ્રબુદ્ધાનામજ્ઞાનાં ઘ્રાણપીડનમ્ ॥ ૩૩॥

વિષયેષ્વાત્મતાં દૃષ્ટ્વા મનસશ્ચિત્તરઞ્જકમ્ ।
પ્રત્યાહારઃ સ વિજ્ઞેયોઽભ્યસનીયો મુહુર્મુહુઃ ॥ ૩૪॥

યત્ર યત્ર મનો યાતિ બ્રહ્મણસ્તત્ર દર્શનાત્ ।
મનસા ધારણં ચૈવ ધારણા સા પરા મતા ॥ ૩૫॥

બ્રહ્મૈવાસ્મીતિ સદ્વૃત્ત્યા નિરાલમ્બતયા સ્થિતિઃ ।

ધ્યાનશબ્દેન વિખ્યાતઃ પરમાનન્દદાયકઃ ॥ ૩૬॥

નિર્વિકારતયા વૃત્ત્યા બ્રહ્માકારતયા પુનઃ ।
વૃત્તિવિસ્મરણં સમ્યક્સમાધિરભિધીયતે ॥ ૩૭॥

ઇમં ચાકૃત્રિમાનન્દં તાવત્સાધુ સમભ્યસેત્ ।
લક્ષ્યો યાવત્ક્ષણાત્પુંસઃ પ્રત્યક્ત્વં સમ્ભવેત્સ્વયમ્ ॥ ૩૮॥

તતઃ સાધનનિર્મુક્તઃ સિદ્ધો ભવતિ યોગિરાટ્ ।
તત્સ્વં રૂપં ભવેત્તસ્ય વિષયો મનસો ગિરામ્ ॥ ૩૯॥

સમાધૌ ક્રિયમાણે તુ વિઘ્નાન્યાયાન્તિ વૈ બલાત્ ।
અનુસન્ધાનરાહિત્યમાલસ્યં ભોગલાલસમ્ ॥ ૪૦॥

લયસ્તમશ્ચ વિક્ષેપસ્તેજઃ સ્વેદશ્ચ શૂન્યતા ।
એવં હિ વિઘ્નબાહુલ્યં ત્યાજ્યં બ્રહ્મવિશારદૈઃ ॥ ૪૧॥

ભાવવૃત્ત્યા હિ ભાવત્વં શૂન્યવૃત્ત્યા હિ શૂન્યતા ।
બ્રહ્મવૃત્ત્યા હિ પૂર્ણત્વં તયા પૂર્ણત્વમભ્યસેત્ ॥ ૪૨॥

યે હિ વૃત્તિં વિહાયૈનાં બ્રહ્માખ્યાં પાવનીં પરામ્ ।
વૃથૈવ તે તુ જીવન્તિ પશુભિશ્ચ સમા નરાઃ ॥ ૪૩॥

યે તુ વૃત્તિં વિજાનન્તિ જ્ઞાત્વા વૈ વર્ધયન્તિ યે ।
તે વૈ સત્પુરુષા ધન્યા વન્દ્યાસ્તે ભુવનત્રયે ॥ ૪૪॥

યેષાં વૃત્તિઃ સમા વૃદ્ધા પરિપક્વા ચ સા પુનઃ ।
તે વૈ સદ્બ્રહ્મતાં પ્રાપ્તા નેતરે શબ્દવાદિનઃ ॥ ૪૫॥

કુશલા બ્રહ્મવાર્તાયાં વૃત્તિહીનાઃ સુરાગિણઃ ।
તેઽપ્યજ્ઞાનતયા નૂનં પુનરાયાન્તિ યાન્તિ ચ ॥ ૪૬॥

નિમિષાર્ધં ન તિષ્ઠન્તિ વૃત્તિં બ્રહ્મમયીં વિના ।
યથા તિષ્ઠન્તિ બ્રહ્માદ્યાઃ સનકાદ્યાઃ શુકાદયઃ ॥ ૪૭॥

કારણં યસ્ય વૈ કાર્યં કારણં તસ્ય જાયતે ।
કારણં તત્ત્વતો નશ્યેત્કાર્યાભાવે વિચારતઃ ॥ ૪૮॥

અથ શુદ્ધં ભવેદ્વસ્તુ યદ્વૈ વાચામગોચરમ્ ।
ઉદેતિ શુદ્ધચિત્તાનાં વૃત્તિજ્ઞાનં તતઃ પરમ્ ॥ ૪૯॥

ભાવિતં તીવ્રવેગેન યદ્વસ્તુ નિશ્ચયાત્મકમ્ ।
દૃશ્યં હ્યદૃશ્યતાં નીત્વા બ્રહ્માકારેણ ચિન્તયેત્ ॥ ૫૦॥

વિદ્વાન્નિત્યં સુખે તિષ્ઠેદ્ધિયા ચિદ્રસપૂર્ણયા ॥

ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

---

અથ હ કુમારઃ શિવં પપ્રચ્છાઽખણ્ડૈકરસ-
ચિન્માત્રસ્વરૂપમનુબ્રૂહીતિ । સ હોવાચ પરમઃ શિવઃ ।
અખણ્ડૈકરસં દૃશ્યમખણ્ડૈકરસં જગત્ ।
અખણ્ડૈકરસં ભાવમખણ્ડૈકરસં સ્વયમ્ ॥ ૧॥

અખણ્ડૈકરસો મન્ત્ર અખણ્ડૈકરસા ક્રિયા ।
અખણ્ડૈકરસં જ્ઞાનમખણ્ડૈકરસં જલમ્ ॥ ૨॥

અખણ્ડૈકરસા ભૂમિરખણ્ડૈકરસં વિયત્ ।
અખણ્ડૈકરસં શાસ્ત્રમખણ્ડૈકરસા ત્રયી ॥ ૩॥

અખણ્ડૈકરસં બ્રહ્મ ચાખણ્ડૈકરસં વ્રતમ્ ।
અખણ્ડૈકરસો જીવ અખણ્ડૈકરસો હ્યજઃ ॥ ૪॥

અખણ્ડૈકરસો બ્રહ્મા અખણ્ડૈકરસો હરિઃ ।
અખણ્ડૈકરસો રુદ્ર અખણ્ડૈકરસોઽસ્મ્યહમ્ ॥ ૫॥

અખણ્ડૈકરસો હ્યાત્મા હ્યખણ્ડૈકરસો ગુરુઃ ।
અખણ્ડૈકરસં લક્ષ્યમખણ્ડૈકરસં મહઃ ॥ ૬॥

અખણ્ડૈકરસો દેહ અખણ્ડૈકરસં મનઃ ।
અખણ્ડૈકરસં ચિત્તમખણ્ડૈકરસં સુખમ્ ॥ ૭॥

અખણ્ડૈકરસા વિદ્યા અખણ્ડૈકરસોઽવ્યયઃ ।
અખણ્ડૈકરસં નિત્યમખણ્ડૈકરસં પરમ્ ॥ ૮॥

અખણ્ડૈકરસં કિઞ્ચિદખણ્ડૈકરસં પરમ્ ।
અખણ્ડૈકરસાદન્યન્નાસ્તિ નાસ્તિ ષડાનન ॥ ૯॥

અખણ્ડૈકરસાન્નાસ્તિ અખણ્ડૈકરસાન્ન હિ ।
અખણ્ડૈકરસાત્કિઞ્ચિદખણ્ડૈકરસાદહમ્ ॥ ૧૦॥

અખણ્ડૈકરસં સ્થૂલં સૂક્ષ્મં ચાખણ્ડરૂપકમ્ ।

અખણ્ડૈકરસં વેદ્યમખણ્ડૈકરસો ભવાન્ ॥ ૧૧॥

અખણ્ડૈકરસં ગુહ્યમખણ્ડૈકરસાદિકમ્ ।
અખણ્ડૈકરસો જ્ઞાતા હ્યખણ્ડૈકરસા સ્થિતિઃ ॥ ૧૨॥

અખણ્ડૈકરસા માતા અખણ્ડૈકરરસઃ પિતા ।
અખણ્ડૈકરસો ભ્રાતા અખણ્ડૈકરસઃ પતિઃ ॥ ૧૩॥

અખણ્ડૈકરસં સૂત્રમખણ્ડૈકરસો વિરાટ્ ।
અખણ્ડૈકરસં ગાત્રમખણ્ડૈકરસં શિરઃ ॥ ૧૪॥

અખણ્ડૈકરસં ચાન્તરખણ્ડૈકરસં બહિઃ ।
અખણ્ડૈકરસં પૂર્ણમખણ્ડૈકરસામૃતમ્ ॥ ૧૫॥

અખૈણ્ડૈકરસં ગોત્રમખણ્ડૈકરસં ગૃહમ્ ।
અખણ્ડૈકરસં ગોપ્યમખણ્ડૈકરસશશી ॥ ૧૬॥

અખણ્ડૈકરસાસ્તારા અખણ્ડૈકરસો રવિઃ ।
અખણ્ડૈકરસં ક્ષેત્રમખણ્ડૈકરસા ક્ષમા ॥ ૧૭॥

અખણ્ડૈકરસ શાન્ત અખણ્ડૈકરસોઽગુણઃ ।
અખણ્ડૈકરસઃ સાક્ષી અખણ્ડૈકરસઃ સુહૃત્ ॥ ૧૮॥

અખણ્ડૈકરસો બન્ધુરખણ્ડૈકરસઃ સખા ।
અખણ્ડૈકરસો રાજા અખણ્ડૈકરસં પુરમ્ ॥ ૧૯॥

અખણ્ડૈકરસં રાજ્યમખણ્ડૈકરસાઃ પ્રજાઃ ।
અખણ્ડૈકરસં તારમખણ્ડૈકરસો જપઃ ॥ ૨૦॥

અખણ્ડૈકરસં ધ્યાનમખણ્ડૈકરસં પદમ્ ।
અખણ્ડૈકરસં ગ્રાહ્યમખણ્ડૈકરસં મહત્ ॥ ૨૧॥

અખણ્ડૈકરસં જ્યોતિરખણ્ડૈકરસં ધનમ્ ।
અખણ્ડૈકરસં ભોજ્યમખણ્ડૈકરસં હવિઃ ॥ ૨૨॥

અખણ્ડૈકરસો હોમ અખણ્ડૈકરસો જપઃ ।
અખણ્ડૈકરસં સ્વર્ગમખણ્ડૈકરસઃ સ્વયમ્ ॥ ૨૩॥

અખણ્ડૈકરસં સર્વં ચિન્માત્રમિતિ ભાવયેત્ ।
ચિન્માત્રમેવ ચિન્માત્રમખણ્ડૈકરસં પરમ્ ॥ ૨૪॥

ભવવર્જિતચિન્માત્રં સર્વં ચિન્માત્રમેવ હિ ।
ઇદં ચ સર્વં ચિન્માત્રમયં ચિન્મયમેવ હિ ॥ ૨૫॥

આત્મભાવં ચ ચિન્માત્રમખણ્ડૈકરસં વિદુઃ ।
સર્વલોકં ચ ચિન્માત્રં વત્તા મત્તા ચ ચિન્મયમ્ ॥ ૨૬॥

આકાશો ભૂર્જલં વાયુરગ્નિર્બ્રહ્મા હરિઃ શિવઃ ।
યત્કિઞ્ચિદ્યન્ન કિઞ્ચિચ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૨૭॥

અખણ્ડૈકરસં સર્વં યદ્યચ્ચિન્માત્રમેવ હિ ।
ભૂતં ભવ્યં ભવિષ્યચ્ચ સર્વં ચિન્માત્રમેવ હિ ॥ ૨૮॥

દ્રવ્યં કાલં ચ ચિન્માત્રં જ્ઞાનં જ્ઞેયં ચિદેવ હિ ।
જ્ઞાતા ચિન્માત્રરૂપશ્ચ સર્વં ચિન્મયમેવ હિ ॥ ૨૯॥

સમ્ભાષણં ચ ચિન્માત્રં યદ્યચ્ચિન્માત્રમેવ હિ ।
અસચ્ચ સચ્ચ ચિન્માત્રમાદ્યન્તં ચિન્મયં સદા ॥ ૩૦॥

આદિરન્તશ્ચ ચિન્માત્રં ગુરુશિષ્યાદિ ચિન્મયમ્ ।
દૃગ્દૃશ્યં યદિ ચિન્માત્રમસ્તિ ચેચ્ચિન્મયં સદા ॥ ૩૧॥

સર્વાશ્ચર્યં હિ ચિન્માત્રં દેહં ચિન્માત્રમેવ હિ ।
લિઙ્ગં ચ કારણં ચૈવ ચિન્માત્રાન્ન હિ વિદ્યતે ॥ ૩૨॥

અહં ત્વં ચૈવ ચિન્માત્રં મૂર્તામૂર્તાદિચિન્મયમ્ ।
પુણ્યં પાપં ચ ચિન્માત્રં જીવશ્ચિન્માત્રવિગ્રહઃ ॥ ૩૩॥

ચિન્માત્રાન્નાસ્તિ સઙ્કલ્પશ્ચિન્માત્રાન્નાસ્તિ વેદનમ્ ।
ચિન્માત્રાન્નાસ્તિ મન્ત્રાદિ ચિન્માત્રાન્નાસ્તિ દેવતા ॥ ૩૪॥

ચિન્માત્રાન્નાસ્તિ દિક્પાલાશ્ચિન્માત્રાદ્વ્યાવહારિકમ્ ।
ચિન્માત્રાત્પરમં બ્રહ્મ ચિન્માત્રાન્નાસ્તિ કોઽપિ હિ ॥ ૩૫॥

ચિન્માત્રાન્નાસ્તિ માયા ચ ચિન્માત્રાન્નાસ્તિ પૂજનમ્ ।
ચિન્માત્રાન્નાસ્તિ મન્તવ્યં ચિન્માત્રાન્નાસ્તિ સત્યકમ્ ॥ ૩૬॥

ચિન્માત્રાન્નાસ્તિ કોશાદિ ચિન્માત્રાન્નાસ્તિ વૈ વસુ ।
ચિન્માત્રાન્નાસ્તિ મૌનં ચ ચિન્માત્રાન્નસ્ત્યમૌનકમ્ ॥ ૩૭॥

ચિન્માત્રાન્નાસ્તિ વૈરાગ્યં સર્વં ચિન્માત્રમેવ હિ ।
યચ્ચ યાવચ્ચ ચિન્માત્રં યચ્ચ યાવચ્ચ દૃશ્યતે ॥ ૩૮॥

યચ્ચ યાવચ્ચ દૂરસ્થં સર્વં ચિન્માત્રમેવ હિ ।
યચ્ચ યાવચ્ચ ભૂતાદિ યચ્ચ યાવચ્ચ લક્ષ્યતે ॥ ૩૯॥

યચ્ચ યાવચ્ચ વેદાન્તાઃ સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રાન્નાસ્તિ ગમનં ચિન્માત્રાન્નાસ્તિ મોક્ષકમ્ ॥ ૪૦॥

ચિન્માત્રાન્નાસ્તિ લક્ષ્યં ચ સર્વં ચિન્માત્રમેવ હિ ।
અખણ્ડૈકરસં બ્રહ્મ ચિન્માત્રાન્ન હિ વિદ્યતે ॥ ૪૧॥

શાસ્ત્રે મયિ ત્વયીશે ચ હ્યખણ્ડૈકરસો ભવાન્ ।
ઇત્યેકરૂપતયા યો વા જાનાત્યહં ત્વિતિ ॥ ૪૨॥

સકૃજ્જ્ઞાનેન મુક્તિઃ સ્યાત્સમ્યગ્જ્ઞાને સ્વયં ગુરુઃ ॥ ૪૩॥

ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

---

કુમારઃ પિતરમાત્માનુભવમનુબ્રૂહીતિ પપ્રચ્છ ।
સ હોવાચ પરઃ શિવઃ ।
પરબ્રહ્મસ્વરૂપોઽહં પરમાનન્દમસ્મ્યહમ્ ।
કેવલં જ્ઞાનરૂપોઽહં કેવલં પરમોઽસ્મ્યહમ્ ॥ ૧॥

કેવલં શાન્તરૂપોઽહં કેવલં ચિન્મયોઽસ્મ્યહમ્ ।
કેવલં નિત્યરૂપોઽહં કેવલં શાશ્વતોઽસ્મ્યહમ્ ॥ ૨॥

કેવલં સત્ત્વરૂપોઽહમહં ત્યક્ત્વાહમસ્મ્યહમ્ ।
સર્વહીનસ્વરૂપોઽહં ચિદાકાશમયોઽસ્મ્યહમ્ ॥ ૩॥

કેવલં તુર્યરૂપોઽસ્મિ તુર્યાતીતોઽસ્મિ કેવલઃ ।
સદા ચૈતન્યરૂપોઽસ્મિ ચિદાનન્દમયોઽસ્મ્યહમ્ ॥ ૪॥

કેવલાકારરૂપોઽસ્મિ શુદ્ધરૂપોઽસ્મ્યહં સદા ।
કેવલં જ્ઞાનરૂપોઽસ્મિ કેવલં પ્રિયમસ્મ્યહમ્ ॥ ૫॥

નિર્વિકલ્પસ્વરૂપોઽસ્મિ નિરીહોઽસ્મિ નિરામયઃ ।
સદાઽસઙ્ગસ્વરૂપોઽસ્મિ નિર્વિકારોઽહમવ્યયઃ ॥ ૬॥

સદૈકરસરૂપોઽસ્મિ સદા ચિન્માત્રવિગ્રહઃ ।
અપરિચ્છિન્નરૂપોઽસ્મિ હ્યખણ્ડાનન્દરૂપવાન્ ॥ ૭॥

સત્પરાનન્દરૂપોઽસ્મિ ચિત્પરાનન્દમસ્મ્યહમ્ ।
અન્તરાન્તરરૂપોઽહમવાઙ્મનસગોચરઃ ॥ ૮॥

આત્માનન્દસ્વરૂપોઽહં સત્યાનન્દોઽસ્મ્યહં સદા ।
આત્મારામસ્વરૂપોઽસ્મિ હ્યયમાત્મા સદાશિવઃ ॥ ૯॥

આત્મપ્રકાશરૂપોઽસ્મિ હ્યાત્મજ્યોતિરસોઽસ્મ્યહમ્ ।
આદિમધ્યાન્તહીનોઽસ્મિ હ્યાકાશસદૃશોઽસ્મ્યહમ્ ॥ ૧૦॥

નિત્યશુદ્ધચિદાનન્દસત્તામાત્રોઽહમવ્યયઃ ।
નિત્યબુદ્ધવિશુદ્ધૈકસચ્ચિદાનન્દમસ્મ્યહમ્ ॥ ૧॥

નિત્યશેષસ્વરૂપોઽસ્મિ સર્વાતીતોઽસ્મ્યહં સદા ।
રૂપાતીતસ્વરૂપોઽસ્મિ પરમાકાશવિગ્રહઃ ॥ ૧૨॥

ભૂમાનન્દસ્વરૂપોઽસ્મિ ભાષાહીનોઽસ્મ્યહં સદા ।
સર્વાધિષ્ઠાનરૂપોઽસ્મિ સર્વદા ચિદ્ઘનોઽસ્મ્યહમ્ ॥ ૧૩॥

દેહભાવવિહીનોઽસ્મિ ચિન્તાહીનોઽસ્મિ સર્વદા ।
ચિત્તવૃત્તિવિહીનોઽહં ચિદાત્મૈકરસોઽસ્મ્યહમ્ ॥ ૧૪॥

સર્વદૃશ્યવિહીનોઽહં દૃગ્રૂપોઽસ્મ્યહમેવ હિ ।
સર્વદા પૂર્ણરૂપોઽસ્મિ નિત્યતૃપ્તોઽસ્મ્યહં સદા ॥ ૧૫॥

અહં બ્રહ્મૈવ સર્વં સ્યાદહં ચૈતન્યમેવ હિ ।
અહમેવાહમેવાસ્મિ ભૂમાકાશસ્વરૂપવાન્ ॥ ૧૬॥

અહમેવ મહાનાત્મા હ્યહમેવ પરાત્પરઃ ।
અહમન્યવદાભામિ હ્યહમેવ શરીરવત્ ॥ ૧૭॥

અહં શિષ્યવદાભામિ હ્યયં લોકત્રયાશ્રયઃ ।
અહં કાલત્રયાતીત અહં વેદૈરુપાસિતઃ ॥ ૧૮॥

અહં શાસ્ત્રેણ નિર્ણીત અહં ચિત્તે વ્યવસ્થિતઃ ।
મત્ત્યક્તં નાસ્તિ કિઞ્ચિદ્વા મત્ત્યક્તં પૃથિવી ચ વા ॥ ૧૯॥

મયાતિરિક્તં યદ્યદ્વા તત્તન્નાસ્તીતિ નિશ્ચિનુ ।
અહં બ્રહ્માસ્મિ સિદ્ધોઽસ્મિ નિત્યશુદ્ધોઽસ્મ્યહં સદા ॥ ૨૦॥

નિર્ગુણઃ કેવલાત્માસ્મિ નિરાકારોઽસ્મ્યહં સદા ।
કેવલં બ્રહ્મમાત્રોઽસ્મિ હ્યજરોઽસ્મ્યમરોઽસ્મ્યહમ્ ॥ ૨૧॥

સ્વયમેવ સ્વયં ભામિ સ્વયમેવ સદાત્મકઃ ।
સ્વયમેવાત્મનિ સ્વસ્થઃ સ્વયમેવ પરા ગતિઃ ॥ ૨૨॥

સ્વયમેવ સ્વયં ભઞ્જે સ્વયમેવ સ્વયં રમે ।
સ્વયમેવ સ્વયં જ્યોતિઃ સ્વયમેવ સ્વયં મહઃ ॥ ૨૩॥

સ્વસ્યાત્મનિ સ્વયં રંસ્યે સ્વાત્મન્યેવ વિલોકયે ।
સ્વાત્મન્યેવ સુખાસીનઃ સ્વાત્મમાત્રાવશેષકઃ ॥ ૨૪॥

સ્વચૈતન્યે સ્વયં સ્થાસ્યે સ્વાત્મરાજ્યે સુખે રમે ।
સ્વાત્મસિંહાસને સ્થિત્વા સ્વાત્મનોઽન્યન્ન ચિન્તયે ॥ ૨૫॥

ચિદ્રૂપમાત્રં બ્રહ્મૈવ સચ્ચિદાનન્દમદ્વયમ્ ।
આનન્દઘન એવાહમહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૨૬॥

સર્વદા સર્વશૂન્યોઽહં સર્વાત્માનન્દવાનહમ્ ।
નિત્યાનન્દસ્વરૂપોઽહમાત્માકાશોઽસ્મિ નિત્યદા ॥ ૨૭॥

અહમેવ હૃદાકાશશ્ચિદાદિત્યસ્વરૂપવાન્ ।
આત્મનાત્મનિ તૃપ્તોઽસ્મિ હ્યરૂપોઽસ્મ્યહમવ્યયઃ ॥ ૨૮॥

એકસઙ્ખ્યાવિહીનોઽસ્મિ નિત્યમુક્તસ્વરૂપવાન્ ।
આકાશાદપિ સૂક્ષ્મોઽહમાદ્યન્તાભાવવાનહમ્ ॥ ૨૯॥

સર્વપ્રકાશરૂપોઽહં પરાવરસુખોઽસ્મ્યહમ્ ।
સત્તામાત્રસ્વરૂપોઽહં શુદ્ધમોક્ષસ્વરૂપવાન્ ॥ ૩૦॥

સત્યાનન્દસ્વરૂપોઽહં જ્ઞાનાનન્દઘનોઽસ્મ્યહમ્ ।
વિજ્ઞાનમાત્રરૂપોઽહં સચ્ચિદાનન્દલક્ષણઃ ॥ ૩૧॥

બ્રહ્મમાત્રમિદં સર્વં બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
તદેવાહં સદાનન્દં બ્રહ્મૈવાહં સનાતનમ્ ॥ ૩૨॥

ત્વમિત્યેતત્તદિત્યેતન્મત્તોઽન્યન્નાસ્તિ કિઞ્ચન ।
ચિચ્ચૈતન્યસ્વરૂપોઽહમહમેવ શિવઃ પરઃ ॥ ૩૩॥

અતિભાવસ્વરૂપોઽહમહમેવ સુખાત્મકઃ ।
સાક્ષિવસ્તુવિહીનત્વાત્સાક્ષિત્વં નાસ્તિ મે સદા ॥ ૩૪॥

કેવલં બ્રહ્મમાત્રત્વાદહમાત્મા સનાતનઃ ।

અહમેવાદિશેષોઽહમહં શેષોઽહમેવ હિ ॥ ૩૫॥

નામરૂપવિમુક્તોઽહમહમાનન્દવિગ્રહઃ ।
ઇન્દ્રિયાભાવરૂપોઽહં સર્વભાવસ્વરૂપકઃ ॥ ૩૬॥

બન્ધમુક્તિવિહીનોઽહં શાશ્વતાનન્દવિગ્રહઃ ।
આદિચૈતન્યમાત્રોઽહમખણ્ડૈકરસોઽસ્મ્યહમ્ ॥ ૩૭॥

વાઙ્મનોઽગોચરશ્ચાહં સર્વત્ર સુખવાનહમ્ ।
સર્વત્ર પૂર્ણરૂપોઽહં ભૂમાનન્દમયોઽસ્મ્યહમ્ ॥ ૩૮॥

સર્વત્ર તૃપ્તિરૂપોઽહં પરામૃતરસોઽસ્મ્યહમ્ ।
એકમેવાદ્વિતીયં સદ્બ્રહ્મૈવાહં ન સંશયઃ ॥ ૩૯॥

સર્વશૂન્યસ્વરૂપોઽહં સકલાગમગોચરઃ ।
મુક્તોઽહં મોક્ષરૂપોઽહં નિર્વાણસુખરૂપવાન્ ॥ ૪૦॥

સત્યવિજ્ઞાનમાત્રોઽહં સન્માત્રાનન્દવાનહમ્ ।
તુરીયાતીતરૂપોઽહં નિર્વિકલ્પસ્વરૂપવાન્ ॥ ૪૧॥

સર્વદા હ્યજરૂપોઽહં નીરાગોઽસ્મિ નિરઞ્જનઃ ।
અહં શુદ્ધોઽસ્મિ બુદ્ધોઽસ્મિ નિત્યોઽસ્મિ પ્રભુરસ્મ્યહમ્ ॥ ૪૨॥

ઓઙ્કારાર્થસ્વરૂપોઽસ્મિ નિષ્કલઙ્કમયોઽસ્મ્યહમ્ ।
ચિદાકારસ્વરૂપોઽસ્મિ નાહમસ્મિ ન સોઽસ્મ્યહમ્ ॥ ૪૩॥

ન હિ કિઞ્ચિત્સ્વરૂપોઽસ્મિ નિર્વ્યાપારસ્વરૂપવાન્ ।
નિરંશોઽસ્મિ નિરાભાસો ન મનો નેન્દ્રિયોઽસ્મ્યહમ્ ॥ ૪૪॥

ન બુદ્ધિર્ન વિકલ્પોઽહં ન દેહાદિત્રયોઽસ્મ્યહમ્ ।
ન જાગ્રત્સ્વપ્નરૂપોઽહં ન સુષુપ્તિસ્વરૂપવાન્ ॥ ૪૫॥

ન તાપત્રયરૂપોઽહં નેષણાત્રયવાનહમ્ ।
શ્રવણં નાસ્તિ મે સિદ્ધેર્મનનં ચ ચિદાત્મનિ ॥ ૪૬॥

સજાતીયં ન મે કિઞ્ચિદ્વિજાતીયં ન મે ક્વચિત્ ।
સ્વગતં ચ ન મે કિઞ્ચિન્ન મે ભેદત્રયં ક્વચિત્ ॥ ૪૭॥

અસત્યં હિ મનોરૂપમસત્યં બુદ્ધિરૂપકમ્ ।
અહઙ્કારમસિદ્ધીતિ નિત્યોઽહં શાશ્વતો હ્યજઃ ॥ ૪૮॥

દેહત્રયમસદ્વિદ્ધિ કાલત્રયમસત્સદા ।
ગુણત્રયમસત્વિદ્ધિ હ્યયં સત્યાત્મકઃ શુચિઃ ॥ ૪૯॥

શ્રુતં સર્વમસત્દ્વિદ્ધિ વેદં સર્વમસત્સદા ।
શાસ્ત્રં સર્વમસત્દ્વિદ્ધિ હ્યહં સત્યચિદાત્મકઃ ॥ ૫૦॥

મૂર્તિત્રયમસદ્વિદ્ધિ સર્વભૂતમસત્સદા ।
સર્વતત્ત્વમસદ્વિદ્ધિ હ્યયં ભૂમા સદાશિવઃ ॥ ૫૧॥

ગુરુશિષ્યમસદ્વિદ્ધિ ગુરોર્મન્ત્રમસત્તતઃ ।
યદ્દૃશ્યં તદસદ્વિદ્ધિ ન માં વિદ્ધિ તથાવિધમ્ ॥ ૫૨॥

યચ્ચિન્ત્યં તદસદ્વિદ્ધિ યન્ન્યાયં તદસત્સદા ।
યદ્ધિતં તદસદ્વિદ્ધિ ન માં વિદ્ધિ તથાવિધમ્ ॥ ૫૩॥

સર્વાન્પ્રાણાનસદ્વિદ્ધિ સર્વાન્ભોગાનસત્ત્વિતિ ।
દૃષ્ટં શ્રુતમસદ્વિદ્ધિ ઓતં પ્રોતમસન્મયમ્ ॥ ૫૪॥

કાર્યાકાર્યમસદ્વિદ્ધિ નષ્ટં પ્રાપ્તમસન્મયમ્ ।
દુઃખાદુઃખમસદ્વિદ્ધિ સર્વાસર્વમન્મયમ્ ॥ ૫૫॥

પૂર્ણાપૂર્ણમસદ્વિદ્ધિ ધર્માધર્મમસન્મયમ્ ।
લાભાલાભાવસદ્વિદ્ધિ જયાજયમસન્મયમ્ ॥ ૫૬॥

શબ્દં સર્વમસદ્વિદ્ધિ સ્પર્શં સર્વમસત્સદા ।
રૂપં સર્વમસદ્વિદ્ધિ રસં સર્વમસન્મયમ્ ॥ ૫૭॥

ગન્ધં સર્વમસદ્વિદ્ધિ સર્વાજ્ઞાનમસન્મયમ્ ।
અસદેવ સદા સર્વમસદેવ ભવોદ્ભવમ્ ॥ ૫૮॥

અસદેવ ગુણં સર્વં સન્માત્રમહમેવ હિ ।
સ્વાત્મમન્ત્રં સદા પશ્યેત્સ્વાત્મમન્ત્રં સદાભ્યસેત્ ॥ ૫૯॥

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં દૃશ્યપાપં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોઽયમન્યમન્ત્રં વિનાશયેત્ ॥ ૬૦॥

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં દેહદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોઽયં જન્મપાપં વિનાશયેત્ ॥ ૬૧॥

અહં બ્રહ્માસ્મિ મન્ત્રોઽયં મૃત્યુપાશં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોઽયં દ્વૈતદુઃખં વિનાશયેત્ ॥ ૬૨॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયં ભેદબુદ્ધિં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયં ચિન્તાદુઃખં વિનાશયેત્ ॥ ૬૩॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયં બુદ્ધિવ્યાધિં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયં ચિત્તબન્ધં વિનાશયેત્ ॥ ૬૪॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયં સર્વવ્યાધીન્વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયં સર્વશોકં વિનાશયેત્ ॥ ૬૫॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયં કામાદીન્નાશયેત્ક્ષણાત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયં ક્રોધશક્તિં વિનાશયેત્ ॥ ૬૬॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયં ચિત્તવૃત્તિં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયં સઙ્કલ્પાદીન્વિનાશયેત્ ॥ ૬૭॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયં કોટિદોષં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયં સર્વતન્ત્રં વિનાશયેત્ ॥ ૬૮॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયમાત્માજ્ઞાનં વિનાશયેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયમાત્મલોકજયપ્રદઃ ॥ ૬૯॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયમપ્રતર્ક્યસુખપ્રદઃ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયમજડત્વં પ્રયચ્છતિ ॥ ૭૦॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયમનાત્માસુરમર્દનઃ ।
અહં બ્રહ્માસ્મિ વજ્રોऽયમનાત્માખ્યગિરીન્હરેત્ ॥ ૭૧॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયમનાત્માખ્યાસુરાન્હરેત્ ।
અહં બ્રહ્માસ્મિ મન્ત્રોऽયં સર્વાંસ્તાન્મોક્ષયિષ્યતિ ॥ ૭૨॥

અહં બ્રહ્માસ્મિ મન્ત્રોऽયં જ્ઞાનાનન્દં પ્રયચ્છતિ ।
સપ્તકોટિમહામન્ત્રં જન્મકોટિશતપ્રદમ્ ॥ ૭૩॥

સર્વમન્ત્રાન્સમુત્સૃજ્ય એતં મન્ત્રં સમભ્યસેત્ ।
સદ્યો મોક્ષમવાપ્નોતિ નાત્ર સન્દેહમણ્વપિ ॥ ૭૪॥

ઇતિ તૃતીયોધ્યાયઃ ॥ ૩॥

કુમારઃ પરમેશ્વરં પપ્રચ્છ જીવન્મુક્તવિદેહમુક્તયોઃ

સ્થિતિમનુબ્રૂહીતિ । સ હોવાચ પરઃ શિવઃ ।
ચિદાત્માહં પરાત્માહં નિર્ગુણોઽહં પરાત્પરઃ ।
આત્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૧॥

દેહત્રયાતિરિક્તોઽહં શુદ્ધચૈતન્યમસ્મ્યહમ્ ।
બ્રહ્માહમિતિ યસ્યાન્તઃ સ જીવનમુક્ત ઉચ્યતે ॥ ૨॥

આનન્દઘનરૂપોઽસ્મિ પરાનન્દઘનોઽસ્મ્યહમ્ ।
યસ્ય દેહાદિકં નાસ્તિ યસ્ય બ્રહ્મેતિ નિશ્ચયઃ ।
પરમાનન્દપૂર્ણો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૩॥

યસ્ય કિઞ્ચિદહં નાસ્તિ ચિન્માત્રેણાવતિષ્ઠતે ।
ચૈતન્યમાત્રો યસ્યાન્તશ્ચિન્માત્રૈકસ્વરૂપવાન્ ॥ ૪॥

સર્વત્ર પૂર્ણરૂપાત્મા સર્વત્રાત્માવશેષકઃ ।
આનન્દરતિરવ્યક્તઃ પરિપૂર્ણશ્ચિદાત્મકઃ ॥ ૫॥

શુદ્ધચૈતન્યરૂપાત્મા સર્વસઙ્ગવિવર્જિતઃ ।
નિત્યાનન્દઃ પ્રસન્નાત્મા હ્યન્યચિન્તાવિવર્જિતઃ ॥ ૬
કિઞ્ચિદસ્તિત્વહીનો યઃ સ જીવન્મુક્ત ઉચ્યતે ।
ન મે ચિત્તં ન મે બુદ્ધિર્નાહઙ્કારો ન ચેન્દ્રિયમ્ ॥ ૭॥

ન મે દેહઃ કદાચિદ્વા ન મે પ્રાણાદયઃ ક્વચિત્ ।
ન મે માયા ન મે કામો ન મે ક્રોધઃ પરોઽસ્મ્યહમ્ ॥ ૮॥

ન મે કિઞ્ચિદિદં વાપિ ન મે કિઞ્ચિત્ક્વચિજ્જગત્ ।
ન મે દોષો ન મે લિઙ્ગં ન મે ચક્ષુર્ન મે મનઃ ॥ ૯॥

ન મે શ્રોત્રં ન મે નાસા ન મે જિહ્વા ન મે કરઃ ।
ન મે જાગ્રન્ન મે સ્વપ્નં ન મે કારણમણ્વપિ ॥ ૧૦॥

ન મે તુરીયમિતિ યઃ સ જીવન્મુક્ત ઉચ્યતે ।
ઇદં સર્વં ન મે કિઞ્ચિદયં સર્વં ન મે ક્વચિત્ ॥ ૧૧॥

ન મે કાલો ન મે દેશો ન મે વસ્તુ ન મે મતિઃ ।
ન મે સ્નાનં ન મે સન્ધ્યા ન મે દૈવં ન મે સ્થલમ્ ॥ ૧૨॥

ન મે તીર્થં ન મે સેવા ન મે જ્ઞાનં ન મે પદમ્ ।
ન મે બન્ધો ન મે જન્મ ન મે વાક્યં ન મે રવિઃ ॥ ૧૩॥

ન મે પુણ્યં ન મે પાપં ન મે કાર્યં ન મે શુભમ્ ।
ને મે જીવ ઇતિ સ્વાત્મા ન મે કિઞ્ચિજ્જગત્રયમ્ ॥ ૧૪॥

ન મે મોક્ષો ન મે દ્વૈતં ન મે વેદો ન મે વિધિઃ ।
ન મેઽન્તિકં ન મે દૂરં ન મે બોધો ન મે રહઃ ॥ ૧૫॥

ન મે ગુરુર્ન મે શિષ્યો ન મે હીનો ન ચાધિકઃ ।
ન મે બ્રહ્મ ન મે વિષ્ણુર્ન મે રુદ્રો ન ચન્દ્રમાઃ ॥ ૧૬॥

ન મે પૃથ્વી ન મે તોયં ન મે વાયુર્ન મે વિયત્ ।
ન મે વહ્નિર્ન મે ગોત્રં ન મે લક્ષ્યં ન મે ભવઃ ॥ ૧૭॥

ન મે ધ્યાતા ન મે ધ્યેયં ન મે ધ્યાનં ન મે મનુઃ ।
ન મે શીતં ન મે ચોષ્ણં ન મે તૃષ્ણા ન મે ક્ષુધા ॥ ૧૮॥

ન મે મિત્રં ન મે શત્રુર્ન મે મોહો ન મે જયઃ ।
ન મે પૂર્વં ન મે પશ્ચાન્ન મે ચોર્ધ્વં ન મે દિશઃ ॥ ૧૯॥

ન મે વક્તવ્યમલ્પં વા ન મે શ્રોતવ્યમણ્વપિ ।
ન મે ગન્તવ્યમીષદ્વા ન મે ધ્યાતવ્યમણ્વપિ ॥ ૨૦॥

ન મે ભોક્તવ્યમીષદ્વા ન મે સ્મર્તવ્યમણ્વપિ ।
ન મે ભોગો ન મે રાગો ન મે યાગો ન મે લયઃ ॥ ૨૧॥

ન મે મૌર્ખ્યં ન મે શાન્તં ન મે બન્ધો ન મે પ્રિયમ્ ।
ન મે મોદઃ પ્રમોદો વા ન મે સ્થૂલં ન મે કૃશમ્ ॥ ૨૨॥

ન મે દીર્ઘં ન મે હ્રસ્વં ન મે વૃદ્ધિર્ન મે ક્ષયઃ ।
અધ્યારોપોઽપવાદો વા ન મે ચૈકં ન મે બહુ ॥ ૨૩॥

ન મે આન્ધ્યં ન મે માન્દ્યં ન મે પટ્વિદમણ્વપિ ।
ન મે માંસં ન મે રક્તં ન મે મેદો ન મે હ્યસૃક્ ॥ ૨૪॥

ન મે મજ્જા ન મેઽસ્થિર્વા ન મે ત્વગ્ધાતુ સપ્તકમ્ ।
ન મે શુક્લં ન મે રક્તં ન મે નીલં નમે પૃથક્ ॥ ૨૫॥

ન મે તાપો ન મે લાભો મુખ્યં ગૌણં ન મે ક્વચિત્ ।
ન મે ભ્રાન્તિર્ન મે સ્થૈર્યં ન મે ગુહ્યં ન મે કુલમ્ ॥ ૨૬॥

ન મે ત્યાજ્યં ન મે ગ્રાહ્યં ન મે હાસ્યં ન મે નયઃ ।
ન મે વૃત્તં ન મે ગ્લાનિર્ન મે શોષ્યં ન મે સુખમ્ ॥ ૨૭॥

ન મે જ્ઞાતા ન મે જ્ઞાનં ન મે જ્ઞેયં ન મે સ્વયમ્ ।
ન મે તુભ્યં નમે મહ્યં ન મે ત્વં ચ ન મે ત્વહમ્ ॥ ૨૮॥

ન મે જરા ન મે બાલ્યં ન મે યૌવનમણ્વપિ ।
અહં બ્રહ્માસ્મ્યહં બ્રહ્માસ્મ્યહં બ્રહ્મેતિ નિશ્ચયઃ ॥ ૨૯॥

ચિદહં ચિદહં ચેતિ સ જીવન્મુક્ત ઉચ્યતે ।
બ્રહ્મૈવાહં ચિદેવાહં પરો વાહં ન સંશયઃ ॥ ૩૦॥

સ્વયમેવ સ્વયં હંસઃ સ્વયમેવ સ્વયં સ્થિતઃ ।
સ્વયમેવ સ્વયં પશ્યેત્સ્વાત્મરાજ્યે સુખં વસેત્ ॥ ૩૧॥

સ્વાત્માનન્દં સ્વયં ભોક્ષ્યેત્સ જીવન્મુક્ત ઉચ્યતે ।
સ્વયમેવૈકવીરોઽગ્રે સ્વયમેવ પ્રભુઃ સ્મૃતઃ ॥ ૩૨॥

બ્રહ્મભૂતઃ પ્રશાન્તાત્મા બ્રહ્માનન્દમયઃ સુખી ।
સ્વચ્છરૂપો મહામૌની વૈદેહી મુક્ત એવ સઃ ॥ ૩૩॥

સર્વાત્મા સમરૂપાત્મા શુદ્ધાત્મા ત્વહમુત્થિતઃ ।
એકવર્જિત એકાત્મા સર્વાત્મા સ્વાત્મમાત્રકઃ ॥ ૩૪॥

અજાત્મા ચામૃતાત્માહં સ્વયમાત્માહમવ્યયઃ ।
લક્ષ્યાત્મા લલિતાત્માહં તૂષ્ણીમાત્મસ્વભાવવાન્ ॥ ૩૫॥

આનન્દાત્મા પ્રિયો હ્યાત્મા મોક્ષાત્મા બન્ધવર્જિતઃ ।
બ્રહ્મૈવાહં ચિદેવાહમેવં વાપિ ન ચિન્ત્યતે ॥ ૩૬॥

ચિન્માત્રેણૈવ યસ્તિષ્ઠેદ્વૈદેહી મુક્ત એવ સઃ ॥ ૩૭॥

નિશ્ચયં ચ પરિત્યજ્ય અહં બ્રહ્મેતિ નિશ્ચયમ્ ।
આનન્દભરિતસ્વાન્તો વૈદેહી મુક્ત એવ સઃ ॥ ૩૮॥

સર્વમસ્તીતિ નાસ્તીતિ નિશ્ચયં ત્યજ્ય તિષ્ઠતિ ।
અહં બ્રહ્માસ્મિ નાસ્મીતિ સચ્ચિદાનન્દમાત્રકઃ ॥ ૩૯॥

કિઞ્ચિત્ક્વચિત્કદાચિચ્ચ આત્માનં ન સ્પૃશત્યસૌ ।
તૂષ્ણીમેવ સ્થિતસ્તૂષ્ણીં તૂષ્ણીં સત્યં ન કિઞ્ચન ॥ ૪૦॥

પરમાત્મા ગુણાતીતઃ સર્વાત્મા ભૂતભાવનઃ ।
કાલભેદં વસ્તુભેદં દેશભેદં સ્વભેદકમ્ ॥ ૪૧॥

કિઞ્ચિદ્ભેદં ન તસ્યાસ્તિ કિઞ્ચિદ્વાપિ ન વિદ્યતે ।
અહં ત્વં તદિદં સોઽયં કાલાત્મા કાલહીનકઃ ॥ ૪૨॥

શૂન્યાત્મા સૂક્ષ્મરૂપાત્મા વિશ્વાત્મા વિશ્વહીનકઃ ।
દેવાત્માદેવહીનાત્મા મેયાત્મા મેયવર્જિતઃ ॥ ૪૩॥

સર્વત્ર જડહીનાત્મા સર્વેષામન્તરાત્મકઃ ।
સર્વસઙ્કલ્પહીનાત્મા ચિન્માત્રોઽસ્મીતિ સર્વદા ॥ ૪૪॥

કેવલઃ પરમાત્માહં કેવલો જ્ઞાનવિગ્રહઃ ।
સત્તામાત્રસ્વરૂપાત્મા નાન્યત્કિઞ્ચિજ્જગદ્ભયમ્ ॥ ૪૫॥

જીવેશ્વરેતિ વાક્ક્વેતિ વેદશાસ્ત્રાદ્યહં ત્વિતિ ।
ઇદં ચૈતન્યમેવેતિ અહં ચૈતન્યમિત્યપિ ॥ ૪૬॥

ઇતિ નિશ્ચયશૂન્યો યો વૈદેહી મુક્ત એવ સઃ ।
ચૈતન્યમાત્રસંસિદ્ધઃ સ્વાત્મારામઃ સુખાસનઃ ॥ ૪૭॥

અપરિચ્છિન્નરૂપાત્મા અણુસ્થૂલાદિવર્જિતઃ ।
તુર્યતુર્યા પરાનન્દો વૈદેહી મુક્ત એવ સઃ ॥ ૪૮॥

નામરૂપવિહીનાત્મા પરસંવિત્સુખાત્મકઃ ।
તુરીયાતીતરૂપાત્મા શુભાશુભવિવર્જિતઃ ॥ ૪૯॥

યોગાત્મા યોગયુક્તાત્મા બન્ધમોક્ષવિવર્જિતઃ ।
ગુણાગુણવિહીનાત્મા દેશકાલાદિવર્જિતઃ ॥ ૫૦॥

સાક્ષ્યસાક્ષિત્વહીનાત્મા કિઞ્ચિત્કિઞ્ચિન્ન કિઞ્ચન ।
યસ્ય પ્રપઞ્ચમાનં ન બ્રહ્માકારમપીહ ન ॥ ૫૧॥

સ્વસ્વરૂપે સ્વયઞ્જ્યોતિઃ સ્વસ્વરૂપે સ્વયંરતિઃ ।
વાચામગોચરાનન્દો વાઙ્મનોગોચરઃ સ્વયમ્ ॥ ૫૨॥

અતીતાતીતભાવો યો વૈદેહી મુક્ત એવ સઃ ।
ચિત્તવૃત્તેરતીતો યશ્ચિત્તવૃત્ત્યવભાસકઃ ॥ ૫૩॥

સર્વવૃત્તિવિહીનાત્મા વૈદેહી મુક્ત એવ સઃ ।
તસ્મિન્કાલે વિદેહીતિ દેહસ્મરણવર્જિતઃ ॥ ૫૪॥

ઈષન્માત્રં સ્મૃતં ચેદ્યસ્તદા સર્વસમન્વિતઃ ।

પરૈરદૃષ્ટબાહ્યાત્મા પરમાનન્દચિદ્ઘનઃ ॥ ૫૫॥

પરૈરદૃષ્ટબાહ્યાત્મા સર્વવેદાન્તગોચરઃ ।
બ્રહ્મામૃતરસાસ્વાદો બ્રહ્મામૃતરસાયનઃ ॥ ૫૬॥

બ્રહ્મામૃતરસાસક્તો બ્રહ્મામૃતરસઃ સ્વયમ્ ।
બ્રહ્મામૃતરસે મગ્નો બ્રહ્માનન્દશિવાર્ચનઃ ॥ ૫૭॥

બ્રહ્મામૃતરસે તૃપ્તો બ્રહ્માનન્દાનુભાવકઃ ।
બ્રહ્માનન્દશિવાનન્દો બ્રહ્માનન્દરસપ્રભઃ ॥ ૫૮॥

બ્રહ્માનન્દપરં જ્યોતિર્બ્રહ્માનન્દનિરન્તરઃ ।
બ્રહ્માનન્દરસાન્નાદો બ્રહ્માનન્દકુટુમ્બકઃ ॥ ૫૯॥

બ્રહ્માનન્દરસારૂઢો બ્રહ્માનન્દૈકચિદ્ઘનઃ ।
બ્રહ્માનન્દરસોદ્બાહો બ્રહ્માનન્દરસમ્ભરઃ ॥ ૬૦॥

બ્રહ્માનન્દજનૈર્યુક્તો બ્રહ્માનન્દાત્મનિ સ્થિતઃ ।
આત્મરૂપમિદં સર્વમાત્મનોઽન્યન્ન કઞ્ચન ॥ ૬૧॥

સર્વમાત્માહમાત્માસ્મિ પરમાત્મા પરાત્મકઃ ।
નિત્યાનન્દ સ્વરૂપાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૬૨॥

પૂર્ણરૂપો મહાનાત્મા પ્રીતાત્મા શાશ્વતાત્મકઃ ।
સર્વાન્તર્યામિરૂપાત્મા નિર્મલાત્મા નિરાત્મકઃ ॥ ૬૩॥

નિર્વિકારસ્વરૂપાત્મા શુદ્ધાત્મા શાન્તરૂપકઃ ।
શાન્તાશાન્તસ્વરૂપાત્મા નૈકાત્મત્વવિવર્જિતઃ ॥ ૬૪॥

જીવાત્મપરમાત્મેતિ ચિન્તાસર્વસ્વવર્જિતઃ ।
મુક્તામુક્તસ્વરૂપાત્મા મુક્તામુક્તવિવર્જિતઃ ॥ ૬૫॥

બન્ધમોક્ષસ્વરૂપાત્મા બન્ધમોક્ષવિવર્જિતઃ ।
દ્વૈતાદ્વૈતસ્વરૂપાત્મા દ્વૈતાદ્વૈતવિવર્જિતઃ ॥ ૬૬॥

સર્વાસર્વસ્વરૂપાત્મા સર્વાસર્વવિવર્જિતઃ ।
મોદપ્રમોદરૂપાત્મા મોદાદિવિનિવર્જિતઃ ॥ ૬૭॥

સર્વસઙ્કલ્પહીનાત્મા વૈદેહી મુક્ત એવ સઃ ।
નિષ્કલાત્મા નિર્મલાત્મા બુદ્ધાત્માપુરુષાત્મકઃ ॥ ૬૮॥

આનન્દાદિવિહીનાત્મા અમૃતાત્મામૃતાત્મકઃ ।
કાલત્રયસ્વરૂપાત્મા કાલત્રયવિવર્જિતઃ ॥ ૬૯॥

અખિલાત્મા હ્યમેયાત્મા માનાત્મા માનવર્જિતઃ ।
નિત્યપ્રત્યક્ષરૂપાત્મા નિત્યપ્રત્યક્ષનિર્ણયઃ ॥ ૭૦॥

અન્યહીનસ્વભાવાત્મા અન્યહીનસ્વયમ્પ્રભઃ ।
વિદ્યાવિદ્યાદિમેયાત્મા વિદ્યાવિદ્યાદિવર્જિતઃ ॥ ૭૧॥

નિત્યાનિત્યવિહીનાત્મા ઇહામુત્રવિવર્જિતઃ ।
શમાદિષટ્કશૂન્યાત્મા મુમુક્ષુત્વાદિવર્જિતઃ ॥ ૭૨॥

સ્થૂલદેહવિહીનાત્મા સૂક્ષ્મદેહવિવર્જિતઃ ।
કારણાદિવિહીનાત્મા તુરીયાદિવિવર્જિતઃ ॥ ૭૩॥

અન્નકોશવિહીનાત્મા પ્રાણકોશવિવર્જિતઃ ।
મનઃકોશવિહીનાત્મા વિજ્ઞાનાદિવિવર્જિતઃ ॥ ૭૪॥

આનન્દકોશહીનાત્મા પઞ્ચકોશવિવર્જિતઃ ।
નિર્વિકલ્પસ્વરૂપાત્મા સવિકલ્પવિવર્જિતઃ ॥ ૭૫॥

દૃશ્યાનુવિદ્ધહીનાત્મા શબ્દવિદ્ધવિવર્જિતઃ ।
સદા સમાધિશૂન્યાત્મા આદિમધ્યાન્તવર્જિતઃ ॥ ૭૬॥

પ્રજ્ઞાનવાક્યહીનાત્મા અહમ્બ્રહ્માસ્મિવર્જિતઃ ।
તત્ત્વમસ્યાદિહીનાત્મા અયમાત્મેત્યભાવકઃ ॥ ૭૭॥

ઓઙ્કારવાચ્યહીનાત્મા સર્વવાચ્યવિવર્જિતઃ ।
અવસ્થાત્રયહીનાત્મા અક્ષરાત્મા ચિદાત્મકઃ ॥ ૭૮॥

આત્મજ્ઞેયાદિહીનાત્મા યત્કિઞ્ચિદિદમાત્મકઃ ।
ભાનાભાનવિહીનાત્મા વૈદેહી મુક્ત એવ સઃ ॥ ૭૯॥

આત્માનમેવ વીક્ષસ્વ આત્માનં બોધય સ્વકમ્ ।
સ્વમાત્માનં સ્વયં ભુઙ્ક્ષ્વ સ્વસ્થો ભવ ષડાનન ॥ ૮૦॥

સ્વમાત્મનિ સ્વયં તૃપ્તઃ સ્વમાત્માનં સ્વયં ચર ।
આત્માનમેવ મોદસ્વ વૈદેહી મુક્તિકો ભવેત્યુપનિષત્ ॥

ઇતિ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

નિદાઘો નામ વૈ મુનિઃ પપ્રચ્છ ઋભું
ભગવન્તમાત્માનાત્મવિવેકમનુબ્રૂહીતિ ।
સ હોવાચ ઋભુઃ ।
સર્વવાચોઽવધિર્બ્રહ્મ સર્વચિન્તાવધિર્ગુરુઃ ।
સર્વકારણકાર્યાત્મા કાર્યકારણવર્જિતઃ ॥ ૧॥

સર્વસઙ્કલ્પરહિતઃ સર્વનાદમયઃ શિવઃ ।
સર્વવર્જિતચિન્માત્રઃ સર્વાનન્દમયઃ પરઃ ॥ ૨॥

સર્વતેજઃપ્રકાશાત્મા નાદાનન્દમયાત્મકઃ ।
સર્વાનુભવનિર્મુક્તઃ સર્વધ્યાનવિવર્જિતઃ ॥ ૩॥

સર્વનાદકલાતીત એષ આત્માહમવ્યયઃ ।
આત્માનાત્મવિવેકાદિભેદાભેદવિવર્જિતઃ ॥ ૪॥

શાન્તાશાન્તાદિહીનાત્મા નાદાન્તર્જ્યોતિરૂપકઃ ।
મહાવાક્યાર્થતો દૂરો બ્રહ્માસ્મીત્યતિદૂરતઃ ॥ ૫॥

તચ્છબ્દવર્જ્યસ્ત્વંશબ્દહીનો વાક્યાર્થવર્જિતઃ ।
ક્ષરાક્ષરવિહીનો યો નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૬॥

અખણ્ડૈકરસો વાહમાનન્દોઽસ્મીતિ વર્જિતઃ ।
સર્વાતીતસ્વભાવાત્મા નાદાન્તર્જ્યોતિરેવ સઃ ॥ ૭॥

આત્મેતિ શબ્દહીનો ય આત્મશબ્દાર્થવર્જિતઃ ।
સચ્ચિદાનન્દહીનો ય એષૈવાત્મા સનાતનઃ ॥ ૮॥

સ નિર્દેષ્ટુમશક્યો યો વેદવાક્યૈરગમ્યતઃ ।
યસ્ય કિઞ્ચિદ્બહિર્નાસ્તિ કિઞ્ચિદન્તઃ કિયન્ન ચ ॥ ૯॥

યસ્ય લિઙ્ગં પ્રપઞ્ચં વા બ્રહ્મૈવાત્મા ન સંશયઃ ।
નાસ્તિ યસ્ય શરીરં વા જીવો વા ભૂતભૌતિકઃ ॥ ૧૦॥

નામરૂપાદિકં નાસ્તિ ભોજ્યં વા ભોગભુક્ચ વા ।
સદ્વાઽસદ્વા સ્થિતિર્વાપિ યસ્ય નાસ્તિ ક્ષરાક્ષરમ્ ॥ ૧૧॥

ગુણં વા વિગુણં વાપિ સમ આત્મા ન સંશયઃ ।
યસ્ય વાચ્યં વાચકં વા શ્રવણં મનનં ચ વા ॥ ૧૨॥

ગુરુશિષ્યાદિભેદં વા દેવલોકાઃ સુરાસુરાઃ ।
યત્ર ધર્મમધર્મં વા શુદ્ધં વાશુદ્ધમણ્વપિ ॥ ૧૩॥

યત્ર કાલમકાલં વા નિશ્ચયઃ સંશયો ન હિ ।
યત્ર મન્ત્રમમન્ત્રં વા વિદ્યાવિદ્યે ન વિદ્યતે ॥ ૧૪॥

દ્રષ્ટૃદર્શનદૃશ્યં વા ઈષન્માત્રં કલાત્મકમ્ ।
અનાત્મેતિ પ્રસઙ્ગો વા હ્યનાત્મેતિ મનોઽપિ વા ॥ ૧૫॥

અનાત્મેતિ જગદ્વાપિ નાસ્તિ નાસ્તિ નિશ્ચિનુ ।
સર્વસઙ્કલ્પશૂન્યત્વાત્સર્વકાર્યવિવર્જનાત્ ॥ ૧૬॥

કેવલં બ્રહ્મમાત્રત્વાન્નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ।
દેહત્રયવિહીનત્વાત્કાલત્રયવિવર્જનાત્ ॥ ૧૭॥

જીવત્રયગુણાભાવાત્તાપત્રયવિવર્જનાત્ ।
લોકત્રયવિહીનત્વાત્સર્વમાત્મેતિ શાસનાત્ ॥ ૧૮॥

ચિત્તાભાચ્ચિન્તનીયં દેહાભાવાજ્જરા ન ચ ।
પાદાભાવાદ્ગતિર્નાસ્તિ હસ્તાભાવાત્ક્રિયા ન ચ ॥ ૧૯॥

મૃત્યુર્નાસ્તિ જનાભાવાદ્બુદ્ધ્યભાવાત્સુખાદિકમ્ ।
ધર્મો નાસ્તિ શુચિર્નાસ્તિ સત્યં નાસ્તિ ભયં ન ચ ॥ ૨૦॥

અક્ષરોચ્ચારણં નાસ્તિ ગુરુશિષ્યાદિ નાસ્ત્યપિ ।
એકાભાવે દ્વિતીયં ન ન દ્વિતીયે ન ચૈકતા ॥ ૨૧॥

સત્યત્વમસ્તિ ચેત્કિઞ્ચિદસત્યં ન ચ સમ્ભવેત્ ।
અસત્યત્વં યદિ ભવેત્સત્યત્વં ન ઘટિષ્યતિ ॥ ૨૨॥

શુભં યદ્યશુભં વિદ્ધિ અશુભાચ્છુભમિષ્યતે ।
ભયં યદ્યભવં વિદ્ધિ અભયાદ્ભયમાપતેત્ ॥ ૨૩॥

બન્ધત્વમપિ ચેન્મોક્ષો બન્ધાભાવે ક્વ મોક્ષતા ।
મરણં યદિ ચેજ્જન્મ જન્માભાવે મૃતિર્ન ચ ॥ ૨૪॥

ત્વમિત્યપિ ભવેચ્ચાહં ત્વં નો ચેદહમેવ ન ।
ઇદં યદિ તદેવાસ્તિ તદભાદિદં ન ચ ॥ ૨૫॥

અસ્તીતિ ચેન્નાસ્તિ તદા નાસ્તિ ચેદસ્તિ કિઞ્ચન ।
કાર્યં ચેત્કારણં કિઞ્ચિત્કાર્યાભાવે ન કારણમ્ ॥ ૨૬॥

દ્વૈતં યદિ તદાઽદ્વૈતં દ્વૈતાભાવે દ્વયં ન ચ ।
દૃશ્યં યદિ દૃગપ્યસ્તિ દૃશ્યાભાવે દૃગેન ન ॥ ૨૭॥

અન્તર્યદિ બહિઃ સત્યમન્તા ભાવે બહિર્ન ચ ।
પૂર્ણત્વમસ્તિ ચેત્કિઞ્ચિદપૂર્ણત્વં પ્રસજ્યતે ॥ ૨૮॥

તસ્માદેતત્ક્વચિન્નાસ્તિ ત્વં ચાહં વા ઇમે ઇદમ્ ।
નાસ્તિ દૃષ્ટાન્તિકં સત્યે નાસ્તિ દાર્ષ્ટાન્તિકં હ્યજે ॥ ૨૯॥

પરમ્બ્રહ્માહમસ્મીતિ સ્મરણસ્ય મનો ન હિ ।
બ્રહ્મમાત્રં જગદિદં બ્રહ્મમાત્રં ત્વમપ્યહમ્ ॥ ૩૦॥

ચિન્માત્રં કેવલં ચાહં નાસ્ત્યનાત્મ્યેતિ નિશ્ચિનુ ।
ઇદં પ્રપઞ્ચં નાસ્ત્યેવ નોત્પન્નં નો સ્થિતં ક્વચિત્ ॥ ૩૧॥

ચિત્તં પ્રપઞ્ચમિત્યાહુર્નાસ્તિ નાસ્ત્યેવ સર્વદા ।
ન પ્રપઞ્ચં ન ચિત્તાદિ નાહઙ્કારો ન જીવકઃ ॥ ૩૨॥

માયાકાર્યાદિકં નાસ્તિ માયા નાસ્તિ ભયં નહિ ।
કર્તા નાસ્તિ ક્રિયા નાસ્તિ શ્રવણં મનનં નહિ ॥ ૩૩॥

સમાધિદ્વિતયં નાસ્તિ માતૃમાનાદિ નાસ્તિ હિ ।
અજ્ઞાનં ચાપિ નાસ્ત્યેવ હ્યવિવેકં કદાચન ॥ ૩૪॥

અનુબન્ધચતુષ્કં ન સમ્બન્ધત્રયમેવ ન ।
ન ગઙ્ગા ન ગયા સેતુર્ન ભૂતં નાન્યદસ્તિ હિ ॥ ૩૫॥

ન ભૂમિર્ન જલં નાગ્નિર્ન ન વાયુર્ન ચ ખં ક્વચિત્ ।
ન દેવા ન ચ દિક્પાલા ન વેદા ન ગુરુઃ ક્વચિત્ ॥ ૩૬॥

ન દૂરં નાસ્તિકં નાલં ન મધ્યં ન ક્વચિત્સ્થિતમ્ ।
નાદ્વૈતં દ્વૈતસત્યં વા હ્યસત્યં વા ઇદં ન ચ ॥ ૩૭॥

બન્ધમોક્ષાદિકં નાસ્તિ સદ્વાઽસદ્વા સુખાદિ વા ।
જાતિર્નાસ્તિ ગતિર્નાસ્તિ વર્ણો નાસ્તિ ન લૌકિકમ્ ॥ ૩૮॥

સર્વં બ્રહ્મેતિ નાસ્ત્યેવ બ્રહ્મ ઇત્યપિ નાસ્તિ હિ ।
ચિદિત્યેવેતિ નાસ્ત્યેવ ચિદહમ્ભાષણં ન હિ ॥ ૩૯॥

અહં બ્રહ્માસ્મિ નાસ્ત્યેવ નિત્યશુદ્ધોઽસ્મિ ન ક્વચિત્ ।

વાચા યદુચ્યતે કિઞ્ચિન્મનસા મનુતે ક્વચિત્ ॥ ૪૦॥

બુદ્ધ્યા નિશ્ચિનુતે નાસ્તિ ચિત્તેન જ્ઞાયતે નહિ ।
યોગી યોગાદિકં નાસ્તિ સદા સર્વં સદા ન ચ ॥ ૪૧॥

અહોરાત્રાદિકં નાસ્તિ સ્નાનધ્યાનાદિકં નહિ ।
ભ્રાન્તિરભ્રાન્તિર્નાસ્ત્યેવ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ॥ ૪૨॥

વેદશાસ્ત્રં પુરાણં ચ કાર્યં કારણમીશ્વરઃ ।
લોકો ભૂતં જનસ્ત્વૈક્યં સર્વં મિથ્યા ન સંશયઃ ॥ ૪૩॥

બન્ધો મોક્ષઃ સુખં દુઃખં ધ્યાનં ચિત્તં સુરાસુરાઃ ।
ગૌણં મુખ્યં પરં ચાન્યત્સર્વં મિથ્યા ન સંશયઃ ॥ ૪૪॥

વાચા વદતિ યત્કિઞ્ચિત્સઙ્કલ્પૈઃ કલ્પ્યતે ચ યત્ ।
મનસા ચિન્ત્યતે યદ્યત્સર્વં મિથ્યા ન સંશયઃ ॥ ૪૫॥

બુદ્ધ્યા નિશ્ચીયતે કિઞ્ચિચ્ચિત્તે નિશ્ચીયતે ક્વચિત્ ।
શાસ્ત્રૈઃ પ્રપઞ્ચ્યતે યદ્યન્નેત્રેણૈવ નિરીક્ષ્યતે ॥ ૪૬॥

શ્રોત્રાભ્યાં શ્રૂયતે યદ્યદન્યત્સદ્ભાવમેવ ચ ।
નેત્રં શ્રોત્રં ગાત્રમેવ મિથ્યેતિ ચ સુનિશ્ચિતમ્ ॥ ૪૭॥

ઇદમિત્યેવ નિર્દિષ્ટમયમિત્યેવ કલ્પ્યતે ।
ત્વમહં તદિદં સોઽહમન્યત્સદ્ભાવમેવ ચ ॥ ૪૮॥

યદ્યત્સમ્ભાવ્યતે લોકે સર્વસઙ્કલ્પસમ્ભ્રમઃ ।
સર્વાધ્યાસં સર્વગોપ્યં સર્વભોગપ્રભેદકમ્ ॥ ૪૯॥

સર્વદોષપ્રભેદાચ્ચ નાસ્ત્યનાત્મેતિ નિશ્ચિનુ ।
મદીયં ચ ત્વદીયં ચ મમેતિ ચ તવેતિ ચ ॥ ૫૦॥

મહ્યં તુભ્યં મયેત્યાદિ તત્સર્વં વિતથં ભવેત્ ।
રક્ષકો વિષ્ણુરિત્યાદિ બ્રહ્મા સૃષ્ટેસ્તુ કારણમ્ ॥ ૫૧॥

સંહારે રુદ્ર ઇત્યેવં સર્વં મિથ્યેતિ નિશ્ચિનુ ।
સ્નાનં જપસ્તપો હોમઃ સ્વાધ્યાયો દેવપૂજનમ્ ॥ ૫૨॥

મન્ત્રં તન્ત્રં ચ સત્સઙ્ગો ગુણદોષવિજૃમ્ભણમ્ ।
અન્તઃકરણસદ્ભાવ અવિદ્યાશ્ચ સમ્ભવઃ ॥ ૫૩॥

અનેકકોટિબ્રહ્માણ્ડં સર્વં મિથ્યેતિ નિશ્ચિનુ ।
સર્વદેશિકવાક્યોક્તિર્યેન કેનાપિ નિશ્ચિતમ્ ॥ ૫૪॥

દૃશ્યતે જગતિ યદ્યદ્યજ્જગતિ વીક્ષ્યતે ।
વર્તતે જગતિ યદ્યત્સર્વં મિથ્યેતિ નિશ્ચિનુ ॥ ૫૫॥

યેન કેનાક્ષરેણોક્તં યેન કેન વિનિશ્ચિતમ્ ।
યેન કેનાપિ ગદિતં યેન કેનાપિ મોદિતમ્ ॥ ૫૬॥

યેન કેનાપિ યદ્દત્તં યેન કેનાપિ યત્કૃતમ્ ।
યત્ર યત્ર શુભં કર્મ યત્ર યત્ર ચ દુષ્કૃતમ્ ॥ ૫૭॥

યદ્યત્કરોષિ સત્યેન સર્વં મિથ્યેતિ નિશ્ચિનુ ।
ત્વમેવ પરમાત્માસિ ત્વમેવ પરમો ગુરુઃ ॥ ૫૮॥

ત્વમેવાકાશરૂપોઽસિ સાક્ષિહીનોઽસિ સર્વદા ।
ત્વમેવ સર્વભાવોઽસિ ત્વં બ્રહ્માસિ ન સંશયઃ ॥ ૫૯॥

કાલહીનોઽસિ કાલોઽસિ સદા બ્રહ્માસિ ચિદ્ઘનઃ ।
સર્વતઃ સ્વસ્વરૂપોઽસિ ચૈતન્યઘનવાનસિ ॥ ૬૦॥

સત્યોઽસિ સિદ્ધોઽસિ સનાતનોઽસિ
મુક્તોઽસિ મોક્ષોઽસિ મુદામૃતોઽસિ ।
દેવોઽસિ શાન્તોઽસિ નિરામયોઽસિ
બ્રહ્માસિ પૂર્ણોઽસિ પરાત્પરોઽસિ ॥ ૬૧॥

સમોઽસિ સચ્ચાપિ સનાતનોઽસિ
સત્યાદિવાક્યૈઃ પ્રતિબોધિતોઽસિ ।
સર્વાઙ્ગહીનોઽસિ સદા સ્થિતોઽસિ
બ્રહ્મેન્દ્રરુદ્રાદિવિભાવિતોઽસિ ॥ ૬૨॥

સર્વપ્રપઞ્ચભ્રમવર્જિતોઽસિ
સર્વેષુ ભૂતેષુ ચ ભાસિતોઽસિ ।
સર્વત્ર સઙ્કલ્પવિવર્જિતોઽસિ
સર્વાગમાન્તાર્થવિભાવિતોઽસિ ॥ ૬૩॥

સર્વત્ર સન્તોષસુખાસનોઽસિ
સર્વત્ર ગત્યાદિવિવર્જિતોઽસિ ।
સર્વત્ર લક્ષ્યાદિવિવર્જિતોઽસિ

ધ્યાતોઽસિ વિષ્ણ્વાદિસુરૈરજસ્રમ્ ॥ ૬૪॥

ચિદાકારસ્વરૂપોઽસિ ચિન્માત્રોઽસિ નિરઙ્કુશઃ ।
આત્મન્યેવ સ્થિતોઽસિ ત્વં સર્વશૂન્યોઽસિ નિર્ગુણઃ ॥ ૬૫॥

આનન્દોઽસિ પરોઽસિ ત્વમેક એવાદ્વિતીયકઃ ।
ચિદ્ઘનાનન્દરૂપોઽસિ પરિપૂર્ણસ્વરૂપકઃ ॥ ૬૬॥

સદસિ ત્વમસિ જ્ઞોઽસિ સોઽસિ જાનાસિ વીક્ષસિ ।
સચ્ચિદાનન્દરૂપોઽસિ વાસુદેવોઽસિ વૈ પ્રભુઃ ॥ ૬૭॥

અમૃતોઽસિ વિભુશ્ચાસિ ચઞ્ચલો હ્યચલો હ્યસિ ।
સર્વોઽસિ સર્વહીનોઽસિ શાન્તાશાન્તવિવર્જિતઃ ॥ ૬૮॥

સત્તામાત્રપ્રકાશોઽસિ સત્તાસામાન્યકો હ્યસિ ।
નિત્યસિદ્ધિસ્વરૂપોઽસિ સર્વસિદ્ધિવિવર્જિતઃ ॥ ૬૯॥

ઈષન્માત્રવિશૂન્યોઽસિ અણુમાત્રવિવર્જિતઃ ।
અસ્તિત્વવર્જિતોઽસિ ત્વં નાસ્તિત્વાદિવિવર્જિતઃ ॥ ૭૦॥

લક્ષ્યલક્ષણહીનોઽસિ નિર્વિકારો નિરામયઃ ।
સર્વનાદાન્તરોઽસિ ત્વં કલાકાષ્ઠાવિવર્જિતઃ ॥ ૭૧॥

બ્રહ્મવિષ્ણ્વીશહીનોઽસિ સ્વસ્વરૂપં પ્રપશ્યસિ ।
સ્વસ્વરૂપાવશેષોઽસિ સ્વાનન્દાબ્ધૌ નિમજ્જસિ ॥ ૭૨॥

સ્વાત્મરાજ્યે સ્વમેવાસિ સ્વયમ્ભાવવિવર્જિતઃ ।
શિષ્ટપૂર્ણસ્વરૂપોઽસિ સ્વસ્માત્કિઞ્ચિન્ન પશ્યસિ ॥ ૭૩॥

સ્વસ્વરૂપાન્ન ચલસિ સ્વસ્વરૂપેણ જૃમ્ભસિ ।
સ્વસ્વરૂપાદનન્યોઽસિ હ્યહમેવાસિ નિશ્ચિનુ ॥ ૭૪॥

ઇદં પ્રપઞ્ચં યત્કિઞ્ચિદ્યદ્યજ્જગતિ વિદ્યતે ।
દૃશ્યરૂપં ચ દૃગ્રૂપં સર્વં શશવિષાણવત્ ॥ ૭૫॥

ભૂમિરાપોઽનલો વાયુઃ ખં મનો બુદ્ધિરેવ ચ ।
અહઙ્કારશ્ચ તેજશ્ચ લોકં ભુવનમણ્ડલમ્ ॥ ૭૬॥

નાશો જન્મ ચ સત્યં ચ પુણ્યપાપજયાદિકમ્ ।
રાગઃ કામઃ ક્રોધલોભૌ ધ્યાનં ધ્યેયં ગુણં પરમ્ ॥ ૭૭॥

ગુરુશિષ્યોપદેશાદિરાદિરન્તં શમં શુભમ્ ।
ભૂતં ભવ્યં વર્તમાનં લક્ષ્યં લક્ષણમદ્વયમ્ ॥ ૭૮॥

શમો વિચારઃ સન્તોષો ભોક્તૃભોજ્યાદિરૂપકમ્ ।
યમાદ્યષ્ટાઙ્ગયોગં ચ ગમનાગમનાત્મકમ્ ॥ ૭૯॥

આદિમધ્યાન્તરઙ્ગં ચ ગ્રાહ્યં ત્યાજ્યં હરિઃ શિવઃ ।
ઇન્દ્રિયાણિ મનશ્ચૈવ અવસ્થાત્રિતયં તથા ॥ ૮૦॥

ચતુર્વિંશતિતત્ત્વં ચ સાધનાનાં ચતુષ્ટયમ્ ।
સજાતીયં વિજાતીયં લોકા ભૂરાદયઃ ક્રમાત્ ॥ ૮૧॥

સર્વવર્ણાશ્રમાચારં મન્ત્રતન્ત્રાદિસઙ્ગ્રહમ્ ।
વિદ્યાવિદ્યાદિરૂપં ચ સર્વવેદં જડાજડમ્ ॥ ૮૨॥

બન્ધમોક્ષવિભાગં ચ જ્ઞાનવિજ્ઞાનરૂપકમ્ ।
બોધાબોધસ્વરૂપં વા દ્વૈતાદ્વૈતાદિભાષણમ્ ॥ ૮૩॥

સર્વવેદાન્તસિદ્ધાન્તં સર્વશાસ્ત્રાર્થનિર્ણયમ્ ।
અનેકજીવસદ્ભાવમેકજીવાદિનિર્ણયમ્ ॥ ૮૪॥

યદ્યદ્ધ્યાયતિ ચિત્તેન યદ્યત્સઙ્કલ્પતે ક્વચિત્ ।
બુદ્ધ્યા નિશ્ચીયતે યદ્યદ્ગુરુણા સંશ◌ૃણોતિ યત્ ॥ ૮૫॥

યદ્યદ્વાચા વ્યાકરોતિ યદ્યદાચાર્યભાષણમ્ ।
યદ્યત્સ્વરેન્દ્રિયૈર્ભાવ્યં યદ્યન્મીમાંસતે પૃથક્ ॥ ૮૬॥

યદ્યન્ન્યાયેન નિર્ણીતં મહદ્ભિર્વેદપારગૈઃ ।
શિવઃ ક્ષરતિ લોકાન્વૈ વિષ્ણુઃ પાતિ જગત્ત્રયમ્ ॥ ૮૭॥

બ્રહ્મા સૃજતિ લોકાન્વૈ એવમાદિક્રિયાદિકમ્ ।
યદ્યદસ્તિ પુરાણેષુ યદ્યદ્વેદેષુ નિર્ણયમ્ ॥ ૮૮॥

સર્વોપનિષદાં ભાવં સર્વં શશવિષાણવત્ ।
દેહોઽહમિતિ સઙ્કલ્પં તદન્તઃકરણં સ્મૃતમ્ ॥ ૮૯॥

દેહોઽહમિતિ સઙ્કલ્પો મહત્સંસાર ઉચ્યતે ।
દેહોઽહમિતિ સઙ્કલ્પસ્તદ્બન્ધમિતિ ચોચ્યતે ॥ ૯૦॥

દેહોઽહમિતિ સઙ્કલ્પસ્તદ્દુઃખમિતિ ચોચ્યતે ।
દેહોઽહમિતિ યદ્ભાનં તદેવ નરકં સ્મૃતમ્ ॥ ૯૧॥

દેહોઽહમિતિ સઙ્કલ્પો જગત્સર્વમિતીર્યતે ।
દેહોઽહમિતિ સઙ્કલ્પો હૃદયગ્રન્થિરીરિતિઃ ॥ ૯૨॥

દેહોઽહમિતિ યજ્જ્ઞાનં તદેવાજ્ઞાનમુચ્યતે ।
દેહોઽહમિતિ યજ્જ્ઞાનં તદસદ્ભાવમેવ ચ ॥ ૯૩॥

દેહોઽહમિતિ યા બુદ્ધિઃ સા ચાવિદ્યેતિ ભણ્યતે ।
દેહોઽહમિતિ યજ્જ્ઞાનં તદેવ દ્વૈતમુચ્યતે ॥ ૯૪॥

દેહોઽહમિતિ સઙ્કલ્પઃ સત્યજીવઃ સ એવ હિ ।
દેહોઽહમિતિ યજ્જ્ઞાનં પરિચ્છિન્નમિતીરિતમ્ ॥ ૯૫॥

દેહોઽહમિતિ સઙ્કલ્પો મહાપાપમિતિ સ્ફુટમ્ ।
દેહોઽહમિતિ યા બુદ્ધિસ્તૃષ્ણા દોષામયઃ કિલ ॥ ૯૬॥

યત્કિઞ્ચિદપિ સઙ્કુલ્પસ્તાપત્રયમિતીરિતમ્ ।
કામં ક્રોધં બન્ધનં સર્વદુઃખં
    વિશ્વં દોષં કાલનાનાસ્વરૂપમ્ ।
યત્કિઞ્ચેદં સર્વસઙ્કલ્પજાલં
    તત્કિઞ્ચેદં માનસં સોમ વિદ્ધિ ॥ ૯૭॥

મન એવ જગત્સર્વં મન એવ મહારિપુઃ ।
મન એવ હિ સંસારો મન એવ જગત્ત્રયમ્ ॥ ૯૮॥

મન એવ મહદ્દુઃખં મન એવ જરાદિકમ્ ।
મન એવ હિ કાલશ્ચ મન એવ મલં તથા ॥ ૯૯॥

મન એવ હિ સઙ્કલ્પો મન એવ હિ જીવકઃ ।
મન એવ હિ ચિત્તં ચ મનોઽહઙ્કાર એવ ચ ॥ ૧૦૦॥

મન એવ મહદ્બન્ધં મનોઽન્તઃકરણં ચ તત્ ।
મન એવ હિ ભૂમિશ્ચ મન એવ હિ તોયકમ્ ॥ ૧૦૧॥

મન એવ હિ તેજશ્ચ મન એવ મરુન્મહાન્ ।
મન એવ હિ ચાકાશં મન એવ હિ શબ્દકમ્ ॥ ૧૦૨॥

સ્પર્શં રૂપં રસં ગન્ધં કોશાઃ પઞ્ચ મનોભવાઃ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિ મનોમયરિતીરિતમ્ ॥ ૧૦૩॥

દિક્પાલા વસવો રુદ્રા આદિત્યાશ્ચ મનોમયાઃ ।
દૃશ્યં જડં દ્વન્દ્વજાતમજ્ઞાનં માનસં સ્મૃતમ્ ॥ ૧૦૪॥

સઙ્કલ્પમેવ યત્કિઞ્ચિત્તત્તન્નાસ્તીતિ નિશ્ચિનુ ।
નાસ્તિ નાસ્તિ જગત્સર્વં ગુરુશિષ્યાદિકં નહીત્યુપનિષત્ ॥ ૧૦૫॥

ઇતિ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

---

ઋભુઃ ॥ સર્વં સચ્ચિન્મયં વિદ્ધિ સર્વં સચ્ચિન્મયં તતમ્ ।
સચ્ચિદાનન્દમદ્વૈતં સચ્ચિદાનન્દમદ્વયમ્ ॥ ૧॥

સચ્ચિદાનન્દમાત્રં હિ સચ્ચિદાનન્દમન્યકમ્ ।
સચ્ચિદાનન્દરૂપોઽહં સચ્ચિદાનન્દમેવ ખમ્ ॥ ૨॥

સચ્ચિદાનન્દમેવ ત્વં સચ્ચિદાનન્દકોઽસ્મ્યહમ્ ।
મનોબુદ્ધિરહઙ્કારચિત્તસઙ્ઘાતકા અમી ॥ ૩॥

ન ત્વં નાહં ન ચાન્યદ્વા સર્વં બ્રહ્મૈવ કેવલમ્ ।
ન વાક્યં ન પદં વેદં નાક્ષરં ન જડં ક્વચિત્ ॥ ૪॥

ન મધ્યં નાદિ નાન્તં વા ન સત્યં ન નિબન્ધજમ્ ।
ન દુઃખં ન સુખં ભાવં ન માયા પ્રકૃતિસ્તથા ॥ ૫॥

ન દેહં ન મુખં ઘ્રાણં ન જિહ્વા ન ચ તાલુની ।
ન દન્તોષ્ઠૌ લલાટં ચ નિશ્વાસોચ્છ્વાસ એવ ચ ॥ ૬॥

ન સ્વેદમસ્થિ માંસં ચ ન રક્તં ન ચ મૂત્રકમ્ ।
ન દૂરં નાન્તિકં નાઙ્ગં નોદરં ન કિરીટકમ્ ॥ ૭॥

ન હસ્તપાદચલનં ન શાસ્ત્રં ન ચ શાસનમ્ ।
ન વેત્તા વેદનં વેદ્યં ન જાગ્રત્સ્વપ્નસુપ્તયઃ ॥ ૮॥

તુર્યાતીતં ન મે કિઞ્ચિત્સર્વં સચ્ચિન્મયં તતમ્ ।
નાધ્યાત્મિકં નાધિભૂતં નાધિદૈવં ન માયિકમ્ ॥ ૯॥

ન વિશ્વતૈજસઃ પ્રાજ્ઞો વિરાટ્સૂત્રાત્મકેશ્વરઃ ।
ન ગમાગમચેષ્ટા ચ ન નષ્ટં ન પ્રયોજનમ્ ॥ ૧૦॥

ત્યાજ્યં ગ્રાહ્યં ન દૂષ્યં વા હ્યમેધ્યામેધ્યકં તથા ।
ન પીનં ન કૃશં ક્લેદં ન કાલં દેશભાષણમ્ ॥ ૧૧॥

ન સર્વં ન ભયં દ્વૈતં ન વૃક્ષતૃણપર્વતાઃ ।
ન ધ્યાનં યોગસંસિદ્ધિર્ન બ્રહ્મવૈશ્યક્ષત્રકમ્ ॥ ૧૨॥

ન પક્ષી ન મૃગો નાઙ્ગી ન લોભો મોહ એવ ચ ।
ન મદો ન ચ માત્સર્યં કામક્રોધાદયસ્તથા ॥ ૧૩॥

ન સ્ત્રીશૂદ્રબિડાલાદિ ભક્ષ્યભોજ્યાદિકં ચ યત્ ।
ન પ્રૌઢહીનો નાસ્તિક્યં ન વાર્તાવસરોઽતિ હિ ॥ ૧૪॥

ન લૌકિકો ન લોકો વા ન વ્યાપારો ન મૂઢતા ।
ન ભોક્તા ભોજનં ભોજ્યં ન પાત્રં પાનપેયકમ્ ॥ ૧૫॥

ન શત્રુમિત્રપુત્રાદિર્ન માતા ન પિતા સ્વસા ।
ન જન્મ ન મૃતિર્વૃદ્ધિર્ન દેહોઽહમિતિ ભ્રમઃ ॥ ૧૬॥

ન શૂન્યં નાપિ ચાશૂન્યં નાન્તઃકરણસંસૃતિઃ ।
ન રાત્રિર્ન દિવા નક્તં ન બ્રહ્મા ન હરિઃ શિવઃ ॥ ૧૭॥

ન વારપક્ષમાસાદિ વત્સરં ન ચ ચઞ્ચલમ્ ।
ન બ્રહ્મલોકો વૈકુણ્ઠો ન કૈલાસો ન ચાન્યકઃ ॥ ૧૮॥

ન સ્વર્ગો ન ચ દેવેન્દ્રો નાગ્નિલોકો ન ચાગ્નિકઃ ।
ન યમો યમલોકો વા ન લોકા લોકપાલકાઃ ॥ ૧૯॥

ન ભૂર્ભુવઃસ્વસ્ત્રૈલોક્યં ન પાતાલં ન ભૂતલમ્ ।
નાવિદ્યા ન ચ વિદ્યા ચ ન માયા પ્રકૃતિર્જડા ॥ ૨૦॥

ન સ્થિરં ક્ષણિકં નાશં ન ગતિર્ન ચ ધાવનમ્ ।
ન ધ્યાતવ્યં ન મે ધ્યાનં ન મન્ત્રો ન જપઃ ક્વચિત્ ॥ ૨૧॥

ન પદાર્થા ન પૂજાર્હં નાભિષેકો ન ચાર્ચનમ્ ।
ન પુષ્પં ન ફલં પત્રં ગન્ધપુષ્પાદિધૂપકમ્ ॥ ૨૨॥

ન સ્તોત્રં ન નમસ્કારો ન પ્રદક્ષિણમણ્વપિ ।
ન પ્રાર્થના પૃથગ્ભાવો ન હવિર્નાગ્નિવન્દનમ્ ॥ ૨૩॥

ન હોમો ન ચ કર્માણિ ન દુર્વાક્યં સુભાષણમ્ ।
ન ગાયત્રી ન વા સન્ધિર્ન મનસ્યં ન દુઃસ્થિતિઃ ॥ ૨૪॥

ન દુરાશા ન દુષ્ટાત્મા ન ચાણ્ડાલો ન પૌલ્કસઃ ।

ન દુઃસહં દુરાલાપં ન કિરાતો ન કૈતવમ્ ॥ ૨૫॥

ન પક્ષપાતં ન પક્ષં વા ન વિભૂષણતસ્કરૌ ।
ન ચ દમ્ભો દામ્ભિકો વા ન હીનો નાધિકો નરઃ ॥ ૨૬॥

નૈકં દ્વયં ત્રયં તુર્યં ન મહત્વં ન ચાલ્પતા ।
ન પૂર્ણં ન પરિચ્છિન્નં ન કાશી ન વ્રતં તપઃ ॥ ૨૭॥

ન ગોત્રં ન કુલં સૂત્રં ન વિભુત્વં ન શૂન્યતા ।
ન સ્ત્રી ન યોષિન્નો વૃદ્ધા ન કન્યા ન વિતન્તુતા ॥ ૨૮॥

ન સૂતકં ન જાતં વા નાન્તર્મુખસુવિભ્રમઃ ।
ન મહાવાક્યમૈક્યં વા નાણિમાદિવિભૂતયઃ ॥ ૨૯॥

સર્વચૈતન્યમાત્રત્વાત્સર્વદોષઃ સદા ન હિ ।
સર્વં સન્માત્રરૂપત્વાત્સચ્ચિદાનન્દમાત્રકમ્ ॥ ૩૦॥

બ્રહ્મૈવ સર્વં નાન્યોઽસ્તિ તદહં તદહં તથા ।
તદેવાહં તદેવાહં બ્રહ્મૈવાહં સનાતનમ્ ॥ ૩૧॥

બ્રહ્મૈવાહં ન સંસારી બ્રહ્મૈવાહં ન મે મનઃ ।
બ્રહ્મૈવાહં ન મે બુદ્ધિર્બ્રહ્મૈવાહં ન ચેન્દ્રિયઃ ॥ ૩૨॥

બ્રહ્મૈવાહં ન દેહોઽહં બ્રહ્મૈવાહં ન ગોચરઃ ।
બ્રહ્મૈવાહં ન જીવોઽહં બ્રહ્મૈવાહં ન ભેદભૂઃ ॥ ૩૩॥

બ્રહ્મૈવાહં જડો નાહમહં બ્રહ્મ ન મે મૃતિઃ ।
બ્રહ્મૈવાહં ન ચ પ્રાણો બ્રહ્મૈવાહં પરાત્પરઃ ॥ ૩૪॥

ઇદં બ્રહ્મ પરં બ્રહ્મ સત્યં બ્રહ્મ પ્રભુર્હિ સઃ ।
કાલો બ્રહ્મ કલા બ્રહ્મ સુખં બ્રહ્મ સ્વયમ્પ્રભમ્ ॥ ૩૫॥

એકં બ્રહ્મ દ્વયં બ્રહ્મ મોહો બ્રહ્મ શમાદિકમ્ ।
દોષો બ્રહ્મ ગુણો બ્રહ્મ દમઃ શાન્તં વિભુઃ પ્રભુઃ ॥ ૩૬॥

લોકો બ્રહ્મ ગુરુર્બ્રહ્મ શિષ્યો બ્રહ્મ સદાશિવઃ ।
પૂર્વં બ્રહ્મ પરં બ્રહ્મ શુદ્ધં બ્રહ્મ શુભાશુભમ્ ॥ ૩૭॥

જીવ એવ સદા બ્રહ્મ સચ્ચિદાનન્દમસ્મ્યહમ્ ।
સર્વં બ્રહ્મમયં પ્રોક્તં સર્વં બ્રહ્મમયં જગત્ ॥ ૩૮॥

સ્વયં બ્રહ્મ ન સન્દેહઃ સ્વસ્માદન્યન્ન કિઞ્ચન ।
સર્વમાત્મૈવ શુદ્ધાત્મા સર્વં ચિન્માત્રમદ્વયમ્ ॥ ૩૯॥

નિત્યનિર્મલરૂપાત્મા હ્યાત્મનોઽન્યન્ન કિઞ્ચન ।
અણુમાત્રલસદ્રૂપમણુમાત્રમિદં જગત્ ॥ ૪૦॥

અણુમાત્રં શરીરં વા હ્યણુમાત્રમસત્યકમ્ ।
અણુમાત્રમચિન્ત્યં વા ચિન્ત્યં વા હ્યણુમાત્રકમ્ ॥ ૪૧॥

બ્રહ્મૈવ સર્વં ચિન્માત્રં બ્રહ્મમાત્રં જગત્ત્રયમ્ ।
આનન્દં પરમાનન્દમન્યત્કિઞ્ચિન્ન કિઞ્ચન ॥ ૪૨॥

ચૈતન્યમાત્રમોઙ્કારં બ્રહ્મૈવ સકલં સ્વયમ્ ।
અહમેવ જગત્સર્વમહમેવ પરં પદમ્ ॥ ૪૩॥

અહમેવ ગુણાતીત અહમેવ પરાત્પરઃ ।
અહમેવ પરં બ્રહ્મ અહમેવ ગુરોર્ગુરુઃ ॥ ૪૪॥

અહમેવાખિલાધાર અહમેવ સુખાત્સુખમ્ ।
આત્મનોઽન્યજ્જગન્નાસ્તિ આત્મનોઽન્યત્સુખં ન ચ ॥ ૪૫॥

આત્મનોઽન્યા ગતિર્નાસ્તિ સર્વમાત્મમયં જગત્ ।
આત્મનોઽન્યન્નહિ ક્વાપિ આત્મનોઽન્યત્તૃણં નહિ ॥ ૪૬॥

આત્મનોઽન્યત્તુષં નાસ્તિ સર્વમાત્મમયં જગત્ ।
બ્રહ્મમાત્રમિદં સર્વં બ્રહ્મમાત્રમસન્ન હિ ॥ ૪૭॥

બ્રહ્મમાત્રં શ્રુતં સર્વં સ્વયં બ્રહ્મૈવ કેવલમ્ ।
બ્રહ્મમાત્રં વૃતં સર્વં બ્રહ્મમાત્રં રસં સુખમ્ ॥ ૪૮॥

બ્રહ્મમાત્રં ચિદાકાશં સચ્ચિદાનન્દમવ્યયમ્ ।
બ્રહ્મણોઽન્યતરન્નાસ્તિ બ્રહ્મણોઽન્યજ્જગન્ન ચ ॥ ૪૯॥

બ્રહ્મણોઽન્યદહ નાસ્તિ બ્રહ્મણોઽન્યત્ફલં નહિ ।
બ્રહ્મણોઽન્યત્તૃણં નાસ્તિ બ્રહ્મણોઽન્યત્પદં નહિ ॥ ૫૦॥

બ્રહ્મણોઽન્યદ્ગુરુર્નાસ્તિ બ્રહ્મણોઽન્યમસદ્વપુઃ ।
બ્રહ્મણોઽન્યન્ન ચાહન્તા ત્વત્તેદન્તે નહિ ક્વચિત્ ॥ ૫૧॥

સ્વયં બ્રહ્માત્મકં વિદ્ધિ સ્વસ્માદન્યન્ન કિઞ્ચન ।
યત્કિઞ્ચિદ્દૃશ્યતે લોકે યત્કિઞ્ચિદ્ભાષ્યતે જનૈઃ ॥ ૫૨॥

યત્કિઞ્ચિદ્ભુજ્યતે ક્વાપિ તત્સર્વમસદેવ હિ ।
કર્તૃભેદં ક્રિયાભેદં ગુણભેદં રસાદિકમ્ ॥ ૫૩ ॥

લિઙ્ગભેદમિદં સર્વમસદેવ સદા સુખમ્ ।
કાલભેદં દેશભેદં વસ્તુભેદં જયાજયમ્ ॥ ૫૪ ॥

યદ્યદ્ભેદં ચ તત્સર્વમસદેવ હિ કેવલમ્ ।
અસદન્તઃકરણકમસદેવેન્દ્રિયાદિકમ્ ॥ ૫૫ ॥

અસત્પ્રાણાદિકં સર્વં સઙ્ઘાતમસદાત્મકમ્ ।
અસત્યં પઞ્ચકોશાખ્યમસત્યં પઞ્ચ દેવતાઃ ॥ ૫૬ ॥

અસત્યં ષડ્વિકારાદિ અસત્યમરિવર્ગકમ્ ।
અસત્યં ષડ્ઋતુશ્ચૈવ અસત્યં ષડ્રસસ્તથા ॥ ૫૭ ॥

સચ્ચિદાનન્દમાત્રોઽહમનુત્પન્નમિદં જગત્ ।
આત્મૈવાહં પરં સત્યં નાન્યાઃ સંસારદૃષ્ટયઃ ॥ ૫૮ ॥

સત્યમાનન્દરૂપોઽહં ચિદ્ઘનાનન્દવિગ્રહઃ ।
અહમેવ પરાનન્દ અહમેવ પરાત્પરઃ ॥ ૫૯ ॥

જ્ઞાનાકારમિદં સર્વં જ્ઞાનાનન્દોઽહમદ્વયઃ ।
સર્વપ્રકાશરૂપોઽહં સર્વાભાવસ્વરૂપકમ્ ॥ ૬૦ ॥

અહમેવ સદા ભામીત્યેવં રૂપં કુતોઽપ્યસત્ ।
ત્વમિત્યેવં પરં બ્રહ્મ ચિન્મયાનન્દરૂપવાન્ ॥ ૬૧ ॥

ચિદાકારં ચિદાકાશં ચિદેવ પરમં સુખમ્ ।
આત્મૈવાહમસન્નાહં કૂટસ્થોઽહં ગુરુઃ પરઃ ॥ ૬૨ ॥

સચ્ચિદાનન્દમાત્રોઽહમનુત્પન્નમિદં જગત્ ।
કાલો નાસ્તિ જગન્નાસ્તિ માયાપ્રકૃતિરેવ ન ॥ ૬૩ ॥

અહમેવ હરિઃ સાક્ષાદહમેવ સદાશિવઃ ।
શુદ્ધચૈતન્યભાવોઽહં શુદ્ધસત્ત્વાનુભાવનઃ ॥ ૬૪ ॥

અદ્વયાનન્દમાત્રોઽહં ચિદ્ઘનૈકરસોઽસ્મ્યહમ્ ।
સર્વં બ્રહ્મૈવ સતતં સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૬૫ ॥

સર્વં બ્રહ્મૈવ સતતં સર્વં બ્રહ્મૈવ ચેતનમ્ ।

સર્વાન્તર્યામિરૂપોઽહં સર્વસાક્ષિત્વલક્ષણઃ ॥ ૬૬॥

પરમાત્મા પરં જ્યોતિઃ પરં ધામ પરા ગતિઃ ।
સર્વવેદાન્તસારોઽહં સર્વશાસ્ત્રસુનિશ્ચિતઃ ॥ ૬૭॥

યોગાનન્દસ્વરૂપોઽહં મુખ્યાનન્દમહોદયઃ ।
સર્વજ્ઞાનપ્રકાશોઽસ્મિ મુખ્યવિજ્ઞાનવિગ્રહઃ ॥ ૬૮॥

તુર્યાતુર્યપ્રકાશોઽસ્મિ તુર્યાતુર્યાદિવર્જિતઃ ।
ચિદક્ષરોઽહં સત્યોઽહં વાસુદેવોઽજરોઽમરઃ ॥ ૬૯॥

અહં બ્રહ્મ ચિદાકાશં નિત્યં બ્રહ્મ નિરઞ્જનમ્ ।
શુદ્ધં બુદ્ધં સદામુક્તમનામકમરૂપકમ્ ॥ ૭૦॥

સચ્ચિદાનન્દરૂપોઽહમનુત્પન્નમિદં જગત્ ।
સત્યાસત્યં જગન્નાસ્તિ સઙ્કલ્પકલનાદિકમ્ ॥ ૭૧॥

નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ।
અનન્તમવ્યયં શાન્તમેકરૂપમનામયમ્ ॥ ૭૨॥

મત્તોઽન્યદસ્તિ ચેન્મિથ્યા યથા મરુમરીચિકા ।
વન્ધ્યાકુમારવચને ભીતિશ્ચેદસ્તિ કિઞ્ચન ॥ ૭૩॥

શશશ‍ૃઙ્ગેણ નાગેન્દ્રો મૃતશ્ચેજ્જગદસ્તિ તત્ ।
મૃગતૃષ્ણાજલં પીત્વા તૃપ્તશ્ચેદસ્ત્વિદં જગત્ ॥ ૭૪॥

નરશ‍ૃઙ્ગેણ નષ્ટશ્ચેત્કશ્ચિદસ્ત્વિદમેવ હિ ।
ગન્ધર્વનગરે સત્યે જગદ્ભવતિ સર્વદા ॥ ૭૫॥

ગગને નીલિમાસત્યે જગત્સત્યં ભવિષ્યતિ ।
શુક્તિકારજતં સત્યં ભૂષણં ચેજ્જગદ્ભવેત્ ॥ ૭૬॥

રજ્જુસર્પેણ દષ્ટશ્ચેન્નરો ભવતુ સંસૃતિઃ ।
જાતરૂપેણ બાણેન જ્વાલાગ્નૌ નાશિતે જગત્ ॥ ૭૭॥

વિન્ધ્યાટવ્યાં પાયસાન્નમસ્તિ ચેજ્જગદુદ્ભવઃ ।
રમ્ભાસ્તમ્ભેન કાષ્ઠેન પાકસિદ્ધૌ જગદ્ભવેત્ ॥ ૭૮॥

સદ્યઃ કુમારિકરૂપૈઃ પાકે સિદ્ધે જગદ્ભવેત્ ।
ચિત્રસ્થદીપૈસ્તમસો નાશશ્ચેદસ્ત્વિદં જગત્ ॥ ૭૯॥

માસાત્પૂર્વં મૃતો મર્ત્યો હ્યાગતશ્ચેજ્જગદ્ભવેત્ ।
તક્રં ક્ષીરસ્વરૂપં ચેત્ક્વચિન્નિત્યં જગદ્ભવેત્ ॥ ૮૦॥

ગોસ્તનાદુદ્ભવં ક્ષીરં પુનરારોપણે જગત્ ।
ભૂરજોઽબ્ધૌ સમુત્પન્ને જગદ્ભવતુ સર્વદા ॥ ૮૧॥

કૂર્મરોમ્ણા ગજે બદ્ધે જગદસ્તુ મદોત્કટે ।
નાલસ્થતન્તુના મેરુશ્ચાલિતશ્ચેજ્જગદ્ભવેત્ ॥ ૮૨॥

તરઙ્ગમાલયા સિન્ધુર્બદ્ધશ્ચેદસ્ત્વિદં જગત્ ।
અગ્નેરધશ્ચેજ્જ્વલનં જગદ્ભવતુ સર્વદા ॥ ૮૩॥

જ્વાલાવહ્નિઃ શીતલશ્ચેદસ્તિરૂપમિદં જગત્ ।
જ્વાલાગ્નિમણ્ડલે પદ્મવૃદ્ધિશ્ચેજ્જગદસ્ત્વિદમ્ ॥ ૮૪॥

મહચ્છૈલેન્દ્રનીલં વા સમ્ભવચ્ચેદિદં જગત્ ।
મેરુરાગત્ય પદ્માક્ષે સ્થિતશ્ચેદસ્ત્વિદં જગત્ ॥ ૮૫॥

નિગિરેચ્ચેદ્ભૃઙ્ગસૂનુર્મેરું ચલવદસ્ત્વિદમ્ ।
મશકેન હતે સિંહે જગત્સત્યં તદાસ્તુ તે ॥ ૮૬॥

અણુકોટરવિસ્તીર્ણે ત્રૈલોક્યં ચેજ્જગદ્ભવેત્ ।
તૃણાનલશ્ચ નિત્યશ્ચેત્ક્ષણિકં તજ્જગદ્ભવેત્ ॥ ૮૭॥

સ્વપ્નદૃષ્ટં ચ યદ્વસ્તુ જાગરે ચેજ્જગદ્ભવઃ ।
નદીવેગો નિશ્ચલશ્ચેત્કેનાપીદં ભવેજ્જગત્ ॥ ૮૮॥

ક્ષુધિતસ્યાગ્નિર્ભોજ્યશ્ચેન્નિમિષં કલ્પિતં ભવેત્ ।
જાત્યન્ધૈ રત્નવિષયઃ સુજ્ઞાતશ્ચેજ્જગત્સદા ॥ ૮૯॥

નપુંસકકુમારસ્ય સ્ત્રીસુખં ચેદ્ભવજ્જગત્ ।
નિર્મિતઃ શશશ‍ૃઙ્ગેણ રથશ્ચેજ્જગદસ્તિ તત્ ॥ ૯૦॥

સદ્યોજાતા તુ યા કન્યા ભોગયોગ્યા ભવેજ્જગત્ ।
વન્ધ્યા ગર્ભાપ્તતત્સૌખ્યં જ્ઞાતા ચેદસ્ત્વિદં જગત્ ॥ ૯૧॥

કાકો વા હંસવદ્ગચ્છેજ્જગદ્ભવતુ નિશ્ચલમ્ ।
મહાખરો વા સિંહેન યુધ્યતે ચેજ્જગત્સ્થિતિઃ ॥ ૯૨॥

મહાખરો ગજગતિં ગતશ્ચેજ્જગદસ્તુ તત્ ।
સમ્પૂર્ણચન્દ્રસૂર્યશ્ચેજ્જગદ્ભાતુ સ્વયં જડમ્ ॥ ૯૩॥

ચન્દ્રસૂર્યાદિકૌ ત્યક્ત્વા રાહુશ્ચેદૃશ્યતે જગત્ ।
ભૃષ્ટબીજસમુત્પન્નવૃદ્ધિશ્ચેજ્જગદસ્તુ સત્ ॥ ૯૪॥

દરિદ્રો ધનિકાનાં ચ સુખં ભુઙ્ક્તે તદા જગત્ ।
શુના વીર્યેણ સિંહસ્તુ જિતો યદિ જગત્તદા ॥ ૯૫॥

જ્ઞાનિનો હૃદયં મૂઢૈર્જ્ઞાતં ચેત્કલ્પનં તદા ।
શ્વાનેન સાગરે પીતે નિઃશેષેણ મનો ભવેત્ ॥ ૯૬॥

શુદ્ધાકાશો મનુષ્યેષુ પતિતશ્ચેત્તદા જગત્ ।
ભૂમૌ વા પતિતં વ્યોમ વ્યોમપુષ્પં સુગન્ધકમ્ ॥ ૯૭॥

શુદ્ધાકાશે વને જાતે ચલિતે તુ તદા જગત્ ।
કેવલે દર્પણે નાસ્તિ પ્રતિબિમ્બં તદા જગત્ ॥ ૯૮॥

અજકુક્ષૌ જગન્નાસ્તિ હ્યાત્મકુક્ષૌ જગન્નહિ ।
સર્વથા ભેદકલનં દ્વૈતાદ્વૈતં ન વિદ્યતે ॥ ૯૯॥

માયાકાર્યમિદં ભેદમસ્તિ ચેદ્બ્રહ્મભાવનમ્ ।
દેહોઽહમિતિ દુઃખં ચેદ્બ્રહ્માહમિતિ નિશ્ચયઃ ॥ ૧૦૦॥

હૃદયગ્રન્થિરસ્તિત્વે છિદ્યતે બ્રહ્મચક્રકમ્ ।
સંશયે સમનુપ્રાપ્તે બ્રહ્મનિશ્ચયમાશ્રયેત્ ॥ ૧૦૧॥

અનાત્મરૂપચોરશ્ચેદાત્મરત્નસ્ય રક્ષણમ્ ।
નિત્યાનન્દમયં બ્રહ્મ કેવલં સર્વદા સ્વયમ્ ॥ ૧૦૨॥

એવમાદિસુદૃષ્ટાન્તૈઃ સાધિતં બ્રહ્મમાત્રકમ્ ।
બ્રહ્મૈવ સર્વભવનં ભુવનં નામ સન્ત્યજ ॥ ૧૦૩॥

અહં બ્રહ્મેતિ નિશ્ચિત્ય અહમ્ભાવં પરિત્યજ ।
સર્વમેવ લયં યાતિ સુપ્તહસ્તસ્થપુષ્પવત્ ॥ ૧૦૪॥

ન દેહો ન ચ કર્માણિ સર્વં બ્રહ્મૈવ કેવલમ્ ।
ન ભૂતં ન ચ કાર્યં ચ ન ચાવસ્થાચતુષ્ટયમ્ ॥ ૧૦૫॥

લક્ષણાત્રયવિજ્ઞાનં સર્વં બ્રહ્મૈવ કેવલમ્ ।
સર્વવ્યાપારમુત્સૃજ્ય હ્યહં બ્રહ્મેતિ ભાવય ॥ ૧૦૬॥

અહં બ્રહ્મ ન સન્દેહો હ્યહં બ્રહ્મ ચિદાત્મકમ્ ।

સચ્ચિદાનન્દમાત્રોઽહમિતિ નિશ્ચિત્ય તત્ત્યજ ॥ ૧૦૭॥

શાઙ્કરીયં મહાશાસ્ત્રં ન દેયં યસ્ય કસ્યચિત્ ।
નાસ્તિકાય કૃતઘ્નાય દુર્વૃત્તાય દુરાત્મને ॥ ૧૦૮॥

ગુરુભક્તિવિશુદ્ધાન્તઃકરણાય મહાત્મને ।
સમ્યક્પરીક્ષ્ય દાતવ્યં માસં ષાણ્માસવત્સરમ્ ॥ ૧૦૯॥

સર્વોપનિષદભ્યાસં દૂરતસ્ત્યજ્ય સાદરમ્ ।
તેજોબિન્દૂપનિષદમભ્યસેત્સર્વદા મુદા ॥ ૧૧૦॥

સકૃદભ્યાસમાત્રેણ બ્રહ્મૈવ ભવતિ સ્વયમ્ ।
બ્રહ્મૈવ ભવતિ સ્વયમિત્યુપનિષત્ ॥

ૐ સહ નાવવતુ ॥ સહ નૌ ભુનક્તુ ॥

સહ વીર્યં કરવાવહૈ ॥

તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥

ઇતિ તેજોબિન્દૂપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

---

*Tejobindu Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*